[5] 'I, that very person appointed by his majesty, the descendant of Puru, for the supervision of religion, have arrived at this sacred grove, for the purpose of ascertaining whether the (religious) rites are free from obstruction.' The sacrifices of holy men were liable to be disturbed by evil

अनसूया ।

[a] सणाहा[1] दाणिं धम्मचारिणो ।

॥ शकुन्तला शृङ्गारलज्जां निरूपयति ॥

सख्यौ ॥ उभयोराकारं[2] विदित्वा जनान्तिकम् ॥

[b] हला सउन्दले । जइ एत्थ अज्ज तादो सण्णिहिदो भवे ।

शकुन्तला ॥ सरोषम् ॥

[c] तदो किं भवे[3] ।

सख्यौ ।

[d] इमं जीविदसव्वस्सेण वि अदिधिविसेसं किदत्थं करिस्सदि[4] ।

[a] सनाथा इदानीं धर्मचारिणः । [b] हला शकुन्तले । यद्यत्राद्य तातः सन्निहितो भवेत् । [c] ततः किं भवेत् । [d] इमं जीवितसर्वस्वेनाप्यतिथिविशेषं कृतार्थं करिष्यति ।

---

spirits called Rākshasas—the determined enemies of piety. No great religious ceremony was ever carried on without these demons attempting to impede its celebration; and the most renowned saints were obliged on such occasions to acknowledge their dependence on the strong arm of the military class for protection. The idea that holy men, who had attained the utmost spiritual power, were unable to cope with the spirits of evil, and the superiority of physical force in this respect is remarkable. (See Rāmāy. bk. i. chaps. 20, 21, 32; and end of Act III. of this play.) In point of fact the Rākshasas were poetical representations of the wild aborigines of the woods.

[1] *Sa-nāthāḥ,* 'possessed of a guardian;' see p. 26, n. 3.

[2] 'Understanding the gestures of both,' i. e. of S'akuntalā and Dushyanta. *Ākāra*=*ćeshṭā* or *in·gita*, 'a gesture,' 'sign,' or rather the state of mind as evidenced by gestures and outward appearances, such as change of colour, &c.

[3] 'What would then happen?' i. e. if he were near at hand, what would he do? Schol.

[4] 'He would make this distinguished guest happy [possessed of the object of his desire] with all the substance of his life,' i. e. he would do worthy honour to his guest by offering him the best of his substance and property. *Sarva-sva*, see p. 33, n. 1. S'. explains *sarva-svam* by *phala-mūlādikam*, 'fruits, roots, and other necessaries of life.' Fruits and roots

शकुन्तला ।

[a] तुम्हे अवेध । किम्पि हिअए करिअ मन्तेधं[1] । ण वो वअणं सुणिस्सं ।

राजा ।

वयमपि तावद्भवत्यौ सखीगतं[2] किमपि पृच्छामः ।

सख्यौ ।

[b] अज्ज । अणुग्गहो विअ इअं अब्भत्थणा ।

राजा ।

भगवान्काश्यपः शाश्वते ब्रह्मणि वर्तते[3] । इयं च वः सखी तदात्मजेति कथमेतत् ।

[a] युवामपेतम् । किमपि हृदये कृत्वा मन्त्रयेथे । न वां वचनं श्रोष्यामि ।
[b] आर्य । अनुग्रह इवेयमभ्यर्थना ।

---

were the chief food of anchorites, and constituted their whole substance. With an offering of these they were commanded to honour every one who came to their hermitage (Rāmāy. i. 52, 16; 61, 4; Manu vi. 7). The allusion, however, evidently is to S'akuntalā, who might be regarded as the holy father's most valuable possession.

[1] 'Get off with you! having formed some (idea) in your heart, you are speaking.' *Hṛidaye* or *manasi kṛi* is not an unusual idiom for 'to turn or cogitate in the mind' (see Rāmāy. ii. 64, 8). *Apetam* is the 2nd du. impv. of *i*, 'to go,' with *apa*.

[2] *Sakhī-gatam*, 'relating to your friend.' (*Śakuntalā-vishayakam*, Schol.) This use of *gata* is noticeable, see note on *ātma-gatam*, p. 38, n. 1. Only one Deva-n. MS. reads *bhavatyau*; but this is supported by the oldest Bengālī, which also adds *kimapi*.

[3] 'His reverence Kāśyapa [see p. 22, n. 1] lives in the constant practice-of-devotion [or in perpetual celibacy].' *Brahman* is properly the Supreme Spirit from which all created things are supposed to emanate and into which they are absorbed. It may also mean the Veda, or holy knowledge. S'. explains *brahman* by *tapas*, i.e. bodily mortification and penance; K. by *brahma-ćarya*, 'the practice of continence.'

अनसूया ।

[a] सुणादु अज्जो । अत्थि कोवि कोसिओत्ति गोत्तणामहेओ महप्पहावो राएसी[1] ।

[a] शृणोत्वार्यः । अस्ति कोऽपि कौशिक इति गोत्रनामधेयो महाप्रभावो राजर्षिः ।

---

[1] 'There is a certain Rājarshi [see p. 39, n. 3] of great majesty, whose family name is Kauśika,' i.e. the celebrated Viśvāmitra (descendant of Kuśa or Kuśika), whose story is told in Rāmāy. bk. i. chaps. 35 and 51–65. He is there described as the son of Gādhi (a prince of the Lunar dynasty, king of Gādhi-pur, or the ancient Kanouj), who is the son of Kuśa-nātha, who is the son of Kuśa or Kuśika. According to Vishṇu-p. the following is the pedigree of Viśvāmitra. One of the sons of Purūravas, a prince of the Lunar dynasty (see Vikramorvaśī), was Amāvasu. Thence in direct succession came Bhīma, Kāñćana, Jahnu, Sumantu, Ajaka, Valākāśva, and Kuśa. The latter had two sons, Kuśāmba and Kuśa-nātha; but Gādhi was son of Kuśāmba, and was said to be an incarnation of Indra (hence sometimes called Kauśika); for Kuśāmba had engaged in great penance, to obtain a son who should be equal to Indra; and the latter becoming alarmed, took upon himself the character of Kuśāmba's son. Gādhi had a daughter, Satyavatī, who married a Brāhman named Ṛićika, son of Bhṛigu. This Ṛićika—with the view of securing to himself a son who should be an illustrious Brāhman, and to his father-in-law a son of great prowess—made two messes of food, one for his own wife, and the other for the wife of Gādhi; infusing into one the qualities suited to a Brāhman, and into the other the properties of power and heroism. The two wives exchanged messes, and so it happened that the wife of Gādhi had a son, Viśvāmitra, who, though a Kshatriya, was born with the inclinations of a Brāhman; and the wife of Ṛićika had a son, the sage Jamad-agni, who was the father of the warrior-priest Paraśurāma, she having by her entreaties induced her husband to transfer the effects of the exchange of food from her son to her grandson. There is something like anachronism in the history of Viśvāmitra. Satyavatī, his sister, was the grandmother of Paraśu-rāma, and it was not till the close of the latter's career that Rāma-ćandra appeared on the field and became the pupil of Viśvāmitra. At any rate the Ṛishi must have been very old. Indeed, in the Rāmāyaṇa he is stated to have mortified himself for two thousand years before he attained the rank of a Ṛishi; for many years more before his cohabitation with Menakā, which led to the birth of Śakuntalā;

राजा ।

अस्ति । श्रूयते ।

अनसूया ।

[a] तं णो पिअसहीए पहवं अवगच्छ । उज्झिआए सरीरसंवड्ढणादीहिं तादकस्सवो से पिदा[1] ।

राजा ।

उज्झितशब्देन जनितं मे कौतूहलम् । आ मूलाच्छ्रोतुमिच्छामि ।

अनसूया ।

[b] सुणादु अज्जो । गोदमीतीरे पुरा किल तस्स राएसिणो उग्गे तवसि वट्टमाणस्स किम्पि जादसङ्केहिं देवेहिं मेणआ णाम अच्छरा पेसिदा णिअमविग्घकारिणी[2] ।

[a] तं नौ प्रियसख्याः प्रभवमवगच्छ । उज्झितायाः शरीरसंवर्धनादिभिस्तातकाश्यपोऽस्याः पिता । [b] शृणोत्वार्यः । गोतमीतीरे पुरा किल तस्य राजर्षेरुग्रे तपसि वर्तमानस्य किमपि जातशङ्कैर्देवैर्मेनका नामाप्सराः प्रेषिता नियमविघ्नकारिणी ।

---

and for many thousand years more before he became a Brāhman. It was not till after this period that he became the preceptor of Rāmaćandra. No chronological inconsistency is too monstrous for Hindū mythology.

[1] 'Know him (to be) the father of our dear friend; but father Kaṇva is the (reputed) father of her, through the fostering of her body, &c., when deserted.' *Prabhava=janma-hetu*, 'the operative cause of being,' i.e. a father.

[2] The story of Viśvāmitra, as told in the Rāmāyaṇa, is briefly this. On his accession to the throne in the room of his father Gādhi, in the course of a tour through his dominions, he visited the hermitage of the sage Vaśishṭha (one of the ten Brahmādikas or Prajāpatis, sons of Brahmā). There the cow of plenty, which granted its owner all desires, and was the property of Vaśishṭha, excited the king's cupidity. He offered the Muni untold treasures in exchange for the cow, but being refused, prepared to take it by force. A long war ensued between the King and the Muni (symbolical of the struggles between the Kshatriya and Brāh-

राजा ।

अस्त्येतदन्यसमाधिभीरुत्वं देवानाम्[1] ।

---

manical classes) which ended in the defeat of Viśvāmitra, whose vexation was such, that he devoted himself to tremendous austerities, hoping to force the gods to make him a Brāhman that he might fight with the saint Vaśishṭha on equal terms. The Rāmāyaṇa goes on to recount how, by gradually increasing the rigour of his bodily mortification through thousands of years, he successively earned the title of Rājarshi (i. 57, 5), Ṛishi (63, 2), Maharshi (63, 19), and finally, Brahmarshi (65, 18). Not till he had gained this last title did Vaśishṭha consent to acknowledge his equality with himself, and ratify his admission into the Brāhmanical state. It was at the time of Viśvāmitra's advancement to the rank of a Ṛishi, and whilst he was still a Kshatriya, that Indra and the gods, jealous of his increasing power—exhibited in his transporting king Triśanku to the region of the stars, and in saving S'unaḥśepa, the son of his own brother-in-law Ṛićīka, out of the hands of Indra, to whom he had been promised by king Ambarīsha as a victim in a sacrifice—sent the nymph Menakā, to seduce him from his life of continence. The Rāmāyaṇa records his surrender to this temptation, and relates that the nymph was his companion in the hermitage for ten years, but does not allude to the birth of S'akuntalā during that period. It only informs us that at the end of ten years the Ṛishi extricated himself from this hindrance (*niyama-vighna*), and abandoning the nymph, departed into another region. See Indian Wisdom, p. 363.

[1] 'Such is the dread which the (inferior) gods have of the devotion of others!' Indra and all the deities below Brahman are really, according to the Hindū system, finite beings, whose existence as separate deities will one day terminate, and whose sovereignty in Svarga, or 'heaven,' is by no means inalienable. They viewed with jealousy and alarm any persistency by a human being in acts of penance which might raise him to a level with themselves; and if carried beyond a certain point, might enable him to dispossess them of paradise. Indra was therefore the enemy of excessive devotion, and had in his service numerous nymphs (*apsaras*), such as Menakā, Rambhā, and Urvaśī, who were called his 'weapons' (*Indrasya praharaṇāni*, Vikram., Act I), and who were constantly sent by him to impede by their seductions the devotions of holy men,

अनसूया ।

[a] तदो वसन्तोदारसमए से उम्मादइत्तअं रूवं पेक्खिअ[1] ।

॥ इत्यर्धोक्ते लज्जया विरमति ॥

राजा ।

परस्तादवगम्यत एवं[2] । सर्वथाप्सरःसम्भवैषा ।

अनसूया ।

[b] अहइं[3] ।

राजा ।

उपपद्यते[4] ।

मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः ।
न प्रभातरलं ज्योतिरुदेति वसुधातलात् ॥२६॥

[a] ततो वसन्तावतारसमयेऽस्या उन्मादयितृकं रूपं प्रेक्ष्य । [b] अथ किम् ।

---

[1] 'Then at the season of the descent of Spring, having looked upon the intoxicating beauty [form] of that (nymph).' Some commentators consider *vasantodāra* to be a compound of *vasanta* and *udāra*; but *odāra* is a legitimate Prākṛit contraction for *avatāra*, although *avadāra* would be equally correct. Cf. *odansayanti* for *avataṇsayanti* (p. 7, n. 1), *hodi* for *havadi* or *bhavati*, *jedi* for *jayadi* or *jayati*, &c. *Avatāra* is from *ava-tṛī*, 'to descend,' and applies especially to the descent of a god from heaven. *Vasanta*, 'the Spring,' is often personified as a deity. See Vikram., Act II, *Pekkhadu bhavaṃ vasantāvadārasūidam assa ahirāmattaṇam pamadavaṇassa*, 'let your honour observe the delightfulness of this pleasure-garden manifested by the descent of Spring.' *Unmādayitṛikam* is for the neut. *unmādayitṛi*, 'that which causes to go mad or be intoxicated' (=*adhairya-janakam*, 'causing unsteadiness').

[2] 'What (happened) afterwards is quite understood [or guessed by me].' The suffix *tāt*, in words like *parastāt*, *adhastāt*, may stand for the nominative case, as well as for abl. and loc. (Pāṇ. v. 3, 27). Hence *parastāt*=*para-vṛittāntaḥ*, 'the rest of the story,' 'the subsequent particulars.'

[3] 'Exactly so,' 'how can it be otherwise?' *Athakim* is a particle of assent.

[4] 'It is fitting (that she should be the daughter of an Apsaras). How

---

Verse 26. Śloka or Anushṭubh. See verses 5, 6, 11.

॥ शकुन्तलाधोमुखी भूत्वा तिष्ठति ॥

राजा ॥ आत्मगतम् ॥

लब्धावकाशो मे मनोरथः[1]। किन्तु सख्याः परिहासोदाहृतां वरप्रार्थनां श्रुत्वा धृतद्वैधीभावकातरं मे मनः[2]।

प्रियंवदा ॥ सस्मितं शकुन्तलां विलोक्य नायकाभिमुखी भूत्वा[3] ॥

[a]पुणोबि वत्तुकामो विअ अज्जो ।

[a] पुनरपि वक्तुकाम इवार्यः ।

---

otherwise could there be the birth of this beautiful-form amongst mortal females? the tremulously-radiant flash does not rise from the surface of the earth (but descends from the skies).' *Apsaraḥ-sambhavatvam* is to be supplied before *upapadyate*. According to K., *prabhā-taralam* (i. e. *prabhayā ćanćalam*) *jyotis* = *vidyut*, 'lightning;' but S. applies it also to the beams of the sun and moon. The comparison of the unearthly beauty of a nymph to the radiance of lightning is common. Cf. Megha-d. 40.

[1] 'My desire has found (free) scope,' i. e. since it is certain that she is not a Brāhmaṇī woman (*asavarṇatva-niśćayāt*, 'from the certainty of her not being of the same class with the holy father'), it is clear that my desire is directed towards an attainable object. *Avakāśa* means 'free course,' 'range,' 'power of expatiating.' Cf. p. 55, l. 3, *labdhāvakāśā me prārthanā;* K. there explains it by *labdhāśrayaḥ* or *sārtho me manorathaḥ*.

[2] 'Nevertheless, having heard her friend's prayer for a husband uttered in joke [see p. 30, l. 1], my heart is held in suspense and anxious,' i. e. anxious to know the truth, as to whether she is really destined for marriage, or for an ascetic life; and fearful lest at some former time her husband may have been decided upon (*pūrvam asyā varo nirṇīto na vā*, K.) S. interprets *vara-prārthanā* by *svāmy-abhilāsha*, 'wish for a husband.' *Dhṛita-dvaidhībhāva-kātaram* is a complex Dvandva compound. *Dvaidhī-bhāva*, 'a state of difference, distraction, doubt.'

[3] 'Looking with a smile at Śakuntalā, (and then) turning her face towards the hero-of-the-poem;' lit. 'having become with her face turned,' &c. All the Deva-n. MSS. have this latter clause. *Nāyaka*, in dramatic poetry, is the leading character or hero of the poem, and *nāyikā*, the heroine. Romeo, in Shakespeare, would be the *nāyaka*, and Juliet the *nāyikā*. In every Hindū play there is also a *prati-nāyaka*, or 'anti-hero,' and an *upa-nāyaka*, or 'sub-hero.' See Indian Wisdom, p. 467.

॥ शकुन्तला सखीमङ्गुल्या तर्जयति[1] ॥

राजा ।

सम्यगुपलक्षितं भवत्या । अस्ति नः सच्चरितश्रवणलोभादन्यदपि प्रष्टव्यम्[2] ।

प्रियंवदा ।

[a] अलं विआरिअ । अणिअन्तणाणुओओ तवस्सिअणो णाम[3] ।

राजा ।

सखीं ते ज्ञातुमिच्छामि ।

वैखानसं किमनया व्रतमा प्रदाना-
द्व्यापाररोधि मदनस्य निषेवितव्यम् ।

[a] अलं विचार्य । अनियन्त्रणानुयोगस्तपस्विजनो नाम ।

---

[1] 'S'akuntalā threatens [reproves] her friend with her finger,' i.e. makes a threatening or chiding gesture, as if she were angry with her friend for leading Dushyanta to pursue his interrogatories, and were ashamed at the revelation of the particulars of her history (*ātmano vrīḍā-janaka-svavṛittāntodghātanam,* K.) According to S'. this is an example of the coquettish gesture called *lalita,* i. e. though she was really eager to hear all that her lover had to say, yet by her outward gestures she appeared to be the reverse (*priyajana-kathā-śuśrūshur api vahis tad-anyathā*).

[2] 'Rightly judged by your ladyship; from an eagerness to hear (all the particulars of) the history of pious people, there is still something (that remains) to be asked by us.'

[3] 'Enough of deliberating; ascetic people may surely be questioned unreservedly [freely].' *Aniyantraṇānuyoga = aniyama-praśna,* 'one to whom a question may be put without any restraint or ceremony,' K. *Alam,* in the sense of prohibiting or forbidding, is more usually found with instr. case of a noun, but, like *khalu,* it may sometimes be used in this sense with an indeclinable participle in *tvā* and *ya,* thus *alaṃ dattvā,* 'enough of giving,' or 'having given, it is enough;' so *khalu pītvā,* 'having drunk, hold!' See Gram. 918. *a.* The Beng. MSS. read *alaṃ vićāritena.*

अत्यन्तमात्मसदृशेक्षणवल्लभाभि-
राहो निवत्स्यति समं हरिणाङ्गनाभिः ॥२७॥

प्रियंवदा ।

[a] अज्ज । धम्मचरणेवि परवसो अअं जणो । गुरुणो उण से अणुरूववरप्पदाणे सङ्कप्पो[2] ।

[a] आर्य । धर्मचरणेऽपि परवशोऽयं जनः । गुरोः पुनरस्या अनुरूपवरप्रदाने सङ्कल्पः ।

---

[1] 'I wish to ascertain (respecting) your friend—Is this monastic vow, (so) opposed to the ways of love, to be observed by her (merely) until her gift-in-marriage; or else (*āho*), will she dwell to the end (of her life) along with the female deer, her favourites (from) having eyes like her own?' Dr. Boehtlingk remarks that *sakhīṃ te jñātuṃ iććhāmi kim anayā*, &c., is equivalent to *jñātum iććhāmi kiṃ sakhyā te*, &c., 'I wish to know whether this vow is to be observed by thy friend,' &c. He gives instances of a similar construction in Draupadī-h. iv. 5; Mahā-bh. iii. 269. *Vaikhānasa*, 'relating to a *vikhānasa* or hermit;' *tena kṛitam proktaṃ vā vratam vaikhānasam, tat tu niyatāraṇya-vāsa-rūpam*, 'the vow which is performed by him or enjoined on him is called *vaikhānasa*, and that consists in always living in the woods,' S'. *Ā pradānāt=pradāna-paryantam*, or *ā vivāhāt*, 'up to the period of her marriage.' In the time of Manu every Hindū girl was given away in marriage before the season of maturity (*ṛitoḥ prāk pradāna-kālaḥ*), and that father incurred great disgrace who did not so give her away. It was deemed highly reprehensible if the betrothed husband did not take her to his own house, when the marriageable period of life arrived; (see Manu ix. 4, with commentary.) *Vyāpāra-rodhi madanasya=kāma-kriyā-nivārakam*, 'hindering amatory actions.' According to K. *ātma-sadṛiśekshaṇa-vallabhābhir* may be optionally resolved into *ātma-sadṛiśekshaṇa-vallabhā ābhir*. *Āho*, a particle of doubt, is used *pakshāntare* or *vikalpe*, i. e. antithetically, in stating an opposite alternative.

[2] 'Even in the practice of religious duties this person [S'akuntalā] is subject to (the will of) another [viz. Kaṇva]; nevertheless, it is the settled purpose of the Guru to give her away to a husband suited to her.' *Ayaṃ janaḥ* may possibly mean 'we.' The same expression occurs in

---

Verse 27. VASANTA-TILAKĀ (a variety of ŚAKVARĪ). See verse 8.

राजा ॥ आत्मगतम् ॥

न दुरवापेयं खलु प्रार्थना[1] ।
भव हृदय साभिलाषं सम्प्रति सन्देहनिर्णयो जातः ।
आशङ्कसे यदग्निं तदिदं स्पर्शक्षमं रत्नम्[2] ॥२८॥

Act IV. Manu (ix. 2, 3) declares that women were never to be deemed fit for independence. Day and night they were to be held by their protectors in subjection. But in certain matters, such as lawful recreations, and if they chose to enter upon a religious life, they were to be left at their own disposal. It seems that even in those matters S'akuntalā was not her own mistress. The holy father had enjoined a life of penance upon her, but had settled that it should not be perpetual. *Api śabdena dharmāćaraṇasya sva-ććhanda-karaṇīyatvaṃ sūćitam*, 'by the word "even" it is indicated that the duties of religion are generally to be performed as a voluntary act,' K. Amara-sinha explains *saṅkalpaḥ* by *mānasaṃ karma*, 'a mental act or resolution.' Vararući's rule (i. 22) by which the Sanskrit *guru* becomes *garua* in Prākṛit only applies to the adjective.

[1] 'This prayer is not difficult of realization,' i. e. a suitable husband, about whom there is this wish, is not difficult to be obtained; *prārthanā-śabdena tad-vishayo varo lakshyate*, K., i. e. *prārthanā* is the prayer supposed to have been made by Kaṇva, that he might find a suitable husband for his foster-child.

[2] 'O (my) heart! become hopeful [possessed of desire]; now the certainty (of what was a matter) of doubt has come to pass. That which thou suspectedst (to be) fire, the same (is) a gem capable of being touched.' *Sandeha-nirṇaya*, 'arriving at positive certainty on a doubtful point.' This was the doubt mentioned just before verse 22, see note to verse 22. *Antaḥ-karaṇa* is there used for *hṛidaya*. *Yad* [*S'akuntalā-rūpam vastu*] *agnim tarkayasi*, 'the thing [viz. S'akuntalā] which thou imaginedst fire,' S'. The power of a Brāhman, especially if exhibited in anger, is compared to fire (verse 41 of this play; Bhaṭṭi-k. i. 23; Mahā-bh. i. 3010). There may be some allusion to this here, or it may

Verse 28. ĀRYĀ or GĀTHĀ. See verse 2.

⏑ ⏑ | ⏑ – ⏑ | – – || – ⏑ ⏑ | – – | ⏑ – ⏑ | – – | –
– – | ⏑ – ⏑ | – – || ⏑ ⏑ – | – – | ⏑ | – – | –

शकुन्तला ॥ सरोषमिव ॥

[a] अणसूए । अहं गमिस्सं ।

अनसूया ।

[b] किण्णिमित्तं ।

शकुन्तला ।

[c] इमं असम्बद्धप्पलाविणिं[1] पिअंवदं अज्जाए गोदमीए णिवेदइस्सं ।

अनसूया ।

[d] सहि । ण जुत्तं ते अकिदसक्कारं अदिहिविसेसं विसज्जिअ सच्छन्ददो गमणं[2] । ॥ शकुन्तला न किञ्चिदुक्त्वा प्रस्थितैव ॥

राजा ॥ ग्रहीतुमिच्छन्निगृह्यात्मानम्[3] । आत्मगतम् ॥

अहो चेष्टाप्रतिरूपिका कामिनो मनोवृत्तिः । अहं हि

[a] अनसूये । अहं गमिष्यामि । [b] किन्निमित्तम् । [c] इमामसम्बद्धप्रलापिनीं प्रियंवदामार्यायै गौतम्यै निवेदयिष्यामि । [d] सखि । न युक्तं तेऽकृतसत्कारमतिथिविशेषं विसृज्य स्वच्छन्दतो गमनम् ।

---

simply mean that, supposing S'akuntalā to have been a Brāhmaṇī woman, she would have been as inapproachable to a Kshatriya as a flame of fire. *Sparśa-kshama*=*samparka-yogya*, see p. 29, n. 1, at end.

[1] *A-sambaddha*, properly 'unconnected;' hence, 'absurd,' 'nonsensical.' *A-baddha* is used with the same acceptation.

[2] Cf. p. 36, n. 1. S'. quotes an aphorism of Bhṛigu, 'Whosoever does not reverently honour an unknown guest, weary with travelling, and hungry and thirsty, him they call (equal in guilt to) the slayer of a-Brāhman.'

[3] 'Wishing [making a movement] to arrest (her departure, but) checking himself.' So read all the Deva-n. MSS. The Beng. have, *utthāya jighṛikshur iva iććhām nigṛihya*, 'rising up as if desirous of holding her (and then) restraining his intention.' It appears from p. 38, l. 3, that the whole party were seated. The Bengālī reading supposes that, with the idea of arresting her departure, he started up and then checked himself.

अनुयास्यन्मुनितनयां सहसा विनयेन वारितप्रसरः ।
स्थानादनुच्चलन्नपि गत्वेव पुनः प्रतिनिवृत्तः[1] ॥२९॥

प्रियंवदा ॥ शकुन्तलां निरुध्य ॥

[a] हला ण दे जुत्तं गन्तुं ।

शकुन्तला ॥ सभ्रूभङ्गम्[2] ॥

[b] किण्णिमित्तं ।

प्रियंवदा ।

[c] रुक्खसेअणाइं दुवे धारेसि[3] मे । एहि दाव । अत्ताणं मोचिअ तदो गमिस्ससि । ॥ इति बलादेनां निवर्तयति ॥

राजा ।

भद्रे । वृक्षसेचनादेव परिश्रान्तामत्रभवतीं लक्षये । तथा ह्यस्याः

[a] हला न ते युक्तं गन्तुम् । [b] किन्निमित्तम् । [c] वृक्षसेचने द्वे धारयसि मे । एहि तावत् । आत्मानं मोचयित्वा ततो गमिष्यसि ।

---

[1] 'Ah! what passes in the mind [the state of mind] of a lover has not a counterpart in his gestures: for, being about to follow the hermit's daughter, all at once I have been restrained from advancing by decorum; although not (really) moving from my place, as if having gone, I have turned back again,' i.e. I feel just as if I had gone and turned back. *Vinayena*=*kula-maryādayā*, S'.;=*sauśīlyena*, K., 'by family honour,' 'by honourable, gentlemanly feeling.' *Vārita-prasara*=*niruddha-gamana*

[2] 'With a frown.' *Bhrū-bhanga*, 'bending of the brow,' was one of the acts of feminine coquetry called *su-kumāra*, 'very delicate.' Under this head are included all coquettish glances of the eye, S'. See p. 32, n. 6; Megha-d. 73.

[3] 'Thou owest me two waterings of trees,' or according to Sir W. Jones, 'You owe me the labour, according to our agreement, of watering two more shrubs.' *Me*=*mahyam*. *Dhṛi* in the causal, in the sense of 'to owe,' requires a dative of the person.

Verse 29. ĀRYĀ or GĀTHĀ. See verse 2.

∪ ∪ – | – ∪ ∪ | ∪ ∪ – || ∪ ∪ – | ∪ ∪ – | ∪ – ∪ | – ∪ ∪ | –
– – | ∪ – ∪ | – ∪ ∪ || – – | ∪ ∪ – | ∪ | ∪ ∪ – | –

स्रस्तांसावतिमात्रलोहिततलौ बाहू घटोत्क्षेपणा-
दद्यापि स्तनवेपथुं जनयति श्वासः प्रमाणाधिकः।
बद्धं कर्णशिरीषरोधि वदने घर्माम्भसां जालकं
बन्धे स्रंसिनि चैकहस्तयमिताः पर्याकुला मूर्धजाः[1]॥३०॥

तदहमेनामनृणां करोमि। ॥ इत्यङ्गुलीयं[2] दातुमिच्छति ॥

॥ उभे नाममुद्राक्षराण्यनुवाच्य परस्परमवलोकयतः[3] ॥

---

[1] 'For her arms have the shoulders drooping, and the lower part [fore-arm] excessively red through tossing the watering-pot. Even now her unnaturally-strong breathing causes a heaving of her breast; a collection of drops of perspiration, impeding (the play of) the S'irīsha in her ears, has formed upon her face; her dishevelled locks, the fillet (that confined them) having given way [fallen], are held together with one hand.' *Bāhu* is the arm from the shoulder-joint (*a͟nsa*) to the wrist, and does not include the *karabha*, or part from the wrist to the fingers. It is divided into two parts, the upper arm, *praganḍa*, or that part of the arm from the elbow to the shoulder; and the lower arm, *prakoshṭha*, commonly called the fore-arm, extending from the elbow to the wrist. *Atilohita-talau* is a Bahuvrīhi comp., in agreement with *bāhū; talau* cannot, therefore, be translated by 'the palms of the hands.' One meaning of *tala* is 'fore-arm,' and S'. explains it by *bhujodara*. It may possibly mean the under-surface of the arms, which would be reddened by chafing against the bark-vesture in lifting the watering-pot. *Pramāṇādhikaḥ=svābhāvika-mānād adhikaḥ*, 'more than natural,' 'undue.' *Baddham*, 'formed' (see p. 29, n. 1). *Jālaka*, 'a net-work;' hence, 'a collection' (=*samūha*). S'. observes that her face was spotted with drops of perspiration resembling net-work. So *svedam ānana-vilagna-jālakam*, Raghu-v. ix. 68. *Karṇa-śirīsha-rodhi*, see p. 7, n. 1. The drops of perspiration would prevent the play of the pendent flower by causing it to adhere to her cheek (*sthirī-karaṇāt*, S'.; *saṃślesha-kāritvāt*, K.) A similar idea occurs in Megha-d. 28, where the lotus of the ears is described as faded by the act of removing the perspiration from the cheeks in hot weather. The lotus-flower, or one of its petals, furnished as common an ornament for the ear as the *śirīsha* (Megha-d. 69, 46). *Paryākulāḥ=vikīrṇāḥ*, 'scattered.'

[2] This is probably the ring which was afterwards given to S'akuntalā, and served as the *abhijñāna* or 'token of recognition.'

[3] 'Both, reading the letters of the seal with the name (of Dushyanta

---

Verse 30. ŚĀRDŪLA-VIKRĪḌITA (a variety of ATIDHṚITI). See verse 14.

राजा ।

अलमस्मानन्यथा सम्भाव्य राज्ञः प्रतिग्रहोऽयमिति राजपुरुषं मामवगच्छथ[1] ।

प्रियंवदा ।

[a]तेण हि णारुहदि एदं अङ्गुलीअअं अङ्गुलीविओअं । अज्जस्स वअणेण अणिरिणा दाणिं एसा । ॥ किञ्चिद्विहस्य ॥ [b]हला सउन्दले मोइदासि अणुअम्पिणा अज्जेण अहवा महाराएण । गच्छ दाणिं ।

शकुन्तला ॥ आत्मगतम् ॥

[c]जइ अत्तणो पहविस्सं । ॥ प्रकाशम् ॥ [d]का तुमं विसज्जिदव्वस्स रुन्धिदव्वस्स वा[2] ।

[a] तेन हि नार्हत्येतदङ्गुलीयकमङ्गुलीवियोगम् । आर्यस्य वचनेनानृणेदानीमेषा ।
[b] हला शकुन्तले मोचितास्यनुकम्पिनार्येण अथवा महाराजेन । गच्छेदानीम् ।
[c] यद्यात्मनः प्रभविष्यामि । [d] का त्वं विस्रष्टव्यस्य रोद्धव्यस्य वा ।

---

stamped on it), look at each other;' [*asau rājā iti kṛitvā*, 'thinking to themselves, This is the king,' K.] All the Deva-n. MSS. read *nāma-mudrāksharāṇi*. *Mudrā* is here, not a 'seal-ring,' but 'the seal or engraved stone on the ring;' *nāma-mudrā*, lit. 'name-seal,' is a seal with a name engraved on it, a signet-seal. So in Mālavik. p. 5, l. 9, and 48, 4, *nāga-mudrā-sanātham aṅgulīyakam*, and *saṛpa-mudrakam aṅgulīyakam*, 'a ring possessed of a snake-seal,' or 'snake-stone seal.' *Anuvāćya=paṭhitvā*, 'having read,' 'having deciphered.' *Vać* and *anuvać* in the causal have generally this sense in dramatic composition.

[1] 'Enough of considering me to be different (from what I am); (observing) that this (ring) is a present from the king, know me (to be) the king's officer,' i. e. do not imagine me to be the king himself; I am only the king's servant, and this is his ring, which he has given me to serve as my credentials. *Alam anyathā sambhāvya = alam anyathā sambhāvanayā* (see p. 48, n. 3). *Pratigraho 'yam*, i. e. *idam aṅgurīyakam mayi dattam*, S'. *Pratigrah*, especially 'to receive a gift,' with gen., e. g. *na rājñaḥ* (or *nṛipasya*) *pratigṛihṇīyāt*, 'let him not receive any gift from the king,' Manu iv. 84. *Pratigraha* is 'that which is received' (*pratigṛihyate*); hence, 'any gift.'

[2] 'Who art thou (in respect) of what is to be allowed to go and what

राजा ॥ शकुन्तलां विलोक्य । आत्मगतम् ॥

किं नु खलु यथा वयमस्यामेवमियमप्यस्मान्प्रति स्यात् । अथवा लब्धावकाशा मे प्रार्थना[1] । कुतः[2] ।

वाचं न मिश्रयति यद्यपि मे वचोभिः
कर्णं ददात्यभिमुखं मयि भाषमाणे ।
कामं न तिष्ठति मदाननसम्मुखी सा
भूयिष्ठमन्यविषया न तु दृष्टिरस्याः[3] ॥३१॥

नेपथ्ये ।

भो भोस्तपस्विनः । सन्निहितास्तपोवनसत्त्वरक्षायै भवत[4] । प्रत्यासन्नः किल मृगयाविहारी पार्थिवो दुष्यन्तः ।

तुरगखुरहतस्तथा हि रेणु-
र्विटपविषक्तजलार्द्रवल्कलेषु ।

---

it is to be held back?' i.e. what power have you to send me away or keep me back? *Kā=na prabhuḥ, avaśā*, K., i.e. you have no right or power (see p. 34, n. 2). This use of gen. for dat., and of the fut. pass. part. for the verbal noun, is peculiar to Prākṛit. The idiom of Sanskṛit would require *visarjanāya rodhanāya vā*, 'for loosing or binding.'

[1] 'My wish has found (free) scope,' i.e. I am at liberty to indulge it. *Prārthanā=manoratha*, K.; see p. 47, n. 1.

[2] *Kutaḥ*, 'whence?' 'why so?' often used where a reason is about to be given in verse for some previous statement. Translateable by 'because.'

[3] 'Although she mingles not her speech with my words, (nevertheless) she places her ear directly opposite to me speaking [when I speak]. Granted that she does not stand with her face towards my face, (still) her eye for the most part is not fixed on any other object.' Thus he was free to indulge his hopes, without being actually certain of their realization *Dadāti* [*nikshipati*, K.] *karṇam*, i.e. *avahitā, tatparā asti*, 'she is very attentive,' S'. *Kāmam*, 'well!' 'granted!' see p. 24, l. 10.

[4] 'Be ye near at hand for the protection of the animals of the penance-grove.' *Sattva=jantu*, 'an animal,' S'. Boehtlingk translates it by *Wesen*, 'being,' 'existence,' 'weal,' which is a legitimate acceptation of the word.

Verse 31. VASANTA-TILAKĀ (a variety of ŚAKVARĪ). See verses 8, 27.

पतति परिणतारुणप्रकाशः
शलभसमूह इवाश्रमद्रुमेषु[1] ॥३२॥

अपि च ।

तीव्राघातप्रतिहततरुस्कन्धलग्नैकदन्तः
पादाकृष्टव्रततिवलयासङ्गसञ्जातपाशः ।
मूर्तो विघ्नस्तपस इव नो भिन्नसारङ्गयूथो
धर्मारण्यं प्रविशति गजः स्यन्दनालोकभीतः[2] ॥३३॥

॥ सर्वाः कर्णं दत्त्वा किञ्चिदिव सम्भ्रान्ताः ॥

---

[1] 'For the dust, raised by the hoofs of the horses, like a swarm of locusts shining in the fading glow of sunset, falls on the trees of the hermitage, having bark-garments, moist with water, suspended (to dry) on the branches.' For *valkaleshu*, see p. 18, n. 1. *Aruṇa* is the glow either of sunrise or sunset, more usually the former. *Pariṇatāruṇa*, as explained by K., is the evening (*sāyantana*) redness of the sun, in contradistinction to the *aruṇodaya* or ruddiness of dawn. *Śalabha-samūha* = *patan·ga-nivaha*, 'a multitude of grasshoppers.'

[2] 'An elephant, terrified at the sight of the (king's) chariot, enters the sacred grove, scaring the herd of deer, a corporeal interruption, as it were, of our penance; having a (kind of) tether, caused by the clinging of a coil of creepers dragged along by his feet; having one of his tusks fixed in the trunk of a tree, struck back with a violent blow.' Such is the reading of all the Deva-n. MSS. The Bengālī have *tīvrāghātād abhimukha-taru-skandha-bhagnaika-danta*, 'with a violent blow having broken one tusk against the trunk of a tree standing in his way.' For *pāda* K. reads *kroḍa*, 'the breast.' *Valaya* = *veshṭana*, 'anything that encircles.' *Pāśa* = *bandhana-rajju*, 'a binding-rope.' *Mūrta* = *mūrti-mat*, 'possessed of a body,' 'corporeal,' as opposed to the spiritual obstruction caused by evil spirits, &c. *Bhinna-sāran·ga-yūthaḥ* is a Bahuvrīhi comp. agreeing with *gajaḥ*, 'an elephant by which (*yena*) the herd of deer (*sāran·ga-yūtham*) has been scattered (*bhinnam* = *vikīrṇam*).' This was probably a wild elephant (*vanya-gaja*), from its being frightened at the sight of the chariot (*syandana*), K. Cf. a scene in Ratn. (Calcutta ed., p. 27).

Verse 32. PUSHPITĀGRĀ, containing twenty-five syllables to the half-verse, each half-verse being alike, the first and third quarter-verses ending at the twelfth syllable.

⏑ ⏑ ⏑ ⏑ ⏑ ⏑ – ⏑ – ⏑ – – || ⏑ ⏑ ⏑ ⏑ – ⏑ ⏑ – ⏑ – ⏑ – ⏓

Verse 33. MANDĀKRĀNTĀ (a variety of ATYASHṬI). See verse 15.

राजा ॥ आत्मगतम् ॥

अहो धिक् पौरा अस्मदन्वेषिणस्तपोवनमुपरुन्धन्ति । भवतु । प्रतिगमिष्यामस्तावत् ।

सख्यौ ।

[a] अज्ज । इमिणा आरण्णअवुत्तन्तेण[1] पज्जाउलम्ह । अणुजाणाहि णो उडअगमणस्स[2] ।

राजा ॥ ससम्भ्रमम् ॥

गच्छन्तु भवत्यः । वयमप्याश्रमपीडा यथा न भविष्यति तथा प्रयतिष्यामहे । ॥ सर्वे उत्तिष्ठन्ति ॥

सख्यौ ।

[b] अज्ज । असम्भाविदादिहिसक्कारं भूओवि पेक्खणणिमित्तं लज्जेमो अज्जं विण्णविदुं[3] ।

राजा ।

मा मैवम् । दर्शनेनैव भवतीनां पुरस्कृतोऽस्मि[4] ।

शकुन्तला ।

[c] अणसूए । अहिणवकुससूईए[5] परिक्खदं मे चलणं ।

[a] आर्य । अनेनारण्यकवृत्तान्तेन पर्याकुलाः स्मः । अनुजानीहि न उटजगमनाय ।
[b] आर्य । असम्भावितातिथिसत्कारं भूयोऽपि प्रेक्षणनिमित्तं लज्जामहे आर्यं विज्ञापयितुम् । [c] अनसूये । अभिनवकुशसूच्या परिक्षतं मे चरणम् ।

---

[1] 'By this forest-incident.' *Vṛittānta* often means 'incident,' 'event.'

[2] There is no dative case in Prākṛit, the genitive supplying its place.

[3] *Vijñāpayitum*, 'to represent respectfully' to a superior (with two accusatives). The phrase *sambhāvitātithi-satkāro bhūyo prekshaṇa-nimittam*, 'adequate hospitality to a guest is a cause of seeing (him) again,' was probably a proverb. The two friends were ashamed to represent this as an argument for a second visit from Dushyanta, as the hospitality they had shewn him had been *a-sambhāvita*, 'inadequate.'

[4] 'Nay, not so; I have received all the honours (of a guest) by the mere sight of your ladyships.' *Puraskṛita*=*satkṛita*, 'hospitably entertained.'

[5] 'By the point of a young Kuśa (leaf).' *Sūći*, 'a needle,' here used for the long tapering point of the leaf of the Kuśa grass (see p. 19, n. 1).

[a] कुरवअ[1]साहापरिलग्गं च वक्कलं। दाव परिपालेध मं। जाव णं मोआवेमि। ॥ इति राजानमेवावलोकयन्ती सव्याजं विलम्ब्य[2] सह सखीभ्यां निष्क्रान्ता ॥

राजा।

मन्दौत्सुक्योऽस्मि नगरगमनं प्रति। यावदनुयात्रिकान्समेत्य नातिदूरे तपोवनस्य निवेशयामि[3]। न खलु शक्नोमि शकुन्तलाव्यापारा[4]दात्मानं निवर्तयितुम्। मम हि

गच्छति पुरः शरीरं धावति पश्चादसंस्तुतं चेतः।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य[5] ॥३४॥

॥ इति निष्क्रान्ताः सर्वे ॥

॥ प्रथमोऽङ्कः ॥

[a] कुरवकशाखापरिलग्नं च वल्कलम्। तावत्परिपालयत माम्। यावदेनन्मोचयामि।

---

[1] A kind of Barleria, with purple flowers and covered with sharp prickles.

[2] 'Pretendedly delaying,' i. e. making some pretext for lingering.

[3] 'I am become indifferent [slackened in my anxiety] about returning to the city. Meanwhile having joined my followers, I will make (them) encamp at no great distance from the penance-grove.' *Ni-viś*, 'to enter,' 'take up a station,' 'encamp' as an army (Manu vii. 188; Raghu-v. v. 42).

[4] 'From occupying myself about S'akuntalā.' *Śakuntalā-goćara-pravartanāt*, K. *Śakuntalā-vividha-ćeshṭitatvāt*, S'.

[5] '(My) body goes forward (towards my retinue); (my) heart, not being in harmony (with my body), runs back (towards S'akuntalā), like the silken flag of a banner borne against the wind.' *Puraḥ*, i. e. *agrataḥ senām prati*, 'forward towards (my) army.' *Paśćāt*, i. e. *prishṭhataḥ Śakuntalām prati*, K. *Asaṃstuta* = *aparićita*, *avaśa*, 'unacquainted,' 'unrelated,' 'not under control (of the body).' *Saṃ-stu*, properly 'to sing or praise in chorus.' Hence *asaṃstuta* probably means, 'not harmonizing,' 'not in concert.' The Beng. MSS. read *asaṃsthitam* (=*avyavastham*), 'restless,' 'unstable,' 'ill-regulated.' *Ćīnān̲śukam*=*ćīna-deśa-bhava-vastra-viśeshaḥ*, 'a kind of cloth produced in the land of China,' 'silk,' 'muslin.'

Verse 34. ĀRYĀ or GĀTHĀ. See verse 2.

– ⏑ ⏑ | ⏑ – ⏑ | – – || – ⏑ ⏑ | – – | ⏑ – ⏑ | – – | –
– – | ⏑ ⏑ ⏑ ⏑ | – – || ⏑ ⏑ – | – – | ⏑ | – – | ⏑

॥ अथ द्वितीयोऽङ्कः ॥

॥ ततः प्रविशति विषण्णो विदूषकः ॥

विदूषकः[1] ॥ निःश्वस्य ॥

[a] भो दिट्ठं । एदस्स मिअआसीलस्स रण्णो वअस्सभावेण णिव्विण्णोम्हि । अअं मिओ । अअं वराहो । अअं सद्दूलो-

[a] भो दिष्टम् । एतस्य मृगयाशीलस्य राज्ञो वयस्यभावेन निर्विण्णोऽस्मि । अयं मृगः । अयं वराहः । अयं शार्दूल

---

[1] *Vidūshaka*, 'merry,' 'facetious,' 'good-natured,' is the title given to the jocose companion and confidential friend of the *nāyaka*, or hero of the piece. This character is to the hero, what the female companion and confidante is to the heroine (*nāyikā*) of the play. He is his constant attendant, and, by a curious regulation, is to be a Brāhman, that is to say, of a caste higher than that of the king himself; yet his business is to excite mirth by being ridiculous in person, age, and attire. S'. says he is grey-haired (*palita*), hump-backed (*kubja*), lame (*khañja*), and with distorted features (*vikṛitānana*); that the chief part of all that he says is humorous and nonsensical; and that he is allowed access to the female apartments (*antaḥpura-ćara*). In fact, he is a kind of buffoon. His attempts at wit, which are never very successful, and his allusions to the pleasures of the table, of which he is a confessed votary, are absurdly contrasted with the sententious solemnity of the despairing hero, crossed in the prosecution of his love-suit. The shrewdness of the heroine's confidantes never seems to fail them under the most trying circumstances; but the clumsy interference of the Vidūshaka in the intrigues of his friend, only serves to augment his difficulties, and occasions many an awkward dilemma. As he is the universal butt, and is allowed in return full liberty of speech, he fills a character very necessary for the enlivenment of the otherwise dull monotony of a Hindū drama. He is called by S'. the *upa-nāyaka* of the piece, or the *nāyakasya upa-nāyakaḥ*, a kind of assistant to the hero (see p. 47, n. 3). K. says, 'The

[a]त्ति मज्झण्णेबि गिम्हविरलपाअबच्छाआसु वणराईसु आहिण्डीअदि अडवीदो अडविं[1] । पत्तसङ्करकसाआणि कडुआणि गिरिणईजलाणि पीअन्ति । अणिअदवेलं सुल्लमंसभूइट्ठो आहारो अण्हीअदि[2] । तुरगाणुधावणकण्डिदसन्धिणो रत्तिम्मिबि णिकामं सइदव्वं णत्थि[3] । तदो

[a] इति मध्याह्नेऽपि ग्रीष्मविरलपादपच्छायासु वनराजिष्वाहिण्ड्यतेऽटव्या अटवीम्। पत्रसङ्करकषायाणि कटूनि गिरिनदीजलानि पीयन्ते । अनियतवेलं शूल्यमांसभूयिष्ठ आहारोऽश्यते । तुरगानुधावनकण्डितसन्धे रात्रावपि निकामं शयितव्यं नास्ति । ततो

Vidūshaka is the name for a ridiculous, childish man (*māṇavaka*), who is always at the side of the hero (*nāyaka-pārśva-parivartin*). He is the companion of his sports and promoter of his amusement (*hāsya-kāri-narma-suhṛid*, or *narma-saćiva*). In effecting the three objects of human life, viz. religious merit, wealth, and pleasure, the family priests assist the king in the first; the heir-apparent (*yuva-rāja*) and the army in the second; the Vidūshaka, the parasite (*pīṭha-marda*), and the pimp (*viṭa*) in the third.' For *viṭa*, see Sanskṛit-English Dictionary.

[1] 'Oh (my evil) destiny! I am worn out by being the associate of this king, who is so addicted to the chase. "Here's a deer," "there's a boar," "yonder's a tiger;" (in the midst of) such (cries and shouts), even at mid-day, is it wandered about from forest to forest, in the paths of the woods, where the shade of the trees is scanty in the hot season.' *Vayasya* is properly 'an associate or companion of about the same age' (*vayas*). *Iti*, 'so saying,' here rather, 'so crying out.' *Vana-rāji*, 'a row of trees,' 'a long tract of forest.' *Āhiṇḍyate*, pres. pass. of rt. *hiṇḍ*, with prep. *ā*, 'to wander about' (an uncommon root); understand *asmābhiḥ*, 'by us.' The Prākṛit is answerable for the collocation of words in this sentence.

[2] 'The bad-smelling [pungent] waters of mountain-streams, astringent from the mixture of leaves, are drunk. At irregular hours a meal, consisting chiefly of meat roasted on spits, is eaten.' *Kaṭu*, 'pungent,' 'ill-scented.' *Śūlya-māṉsa*, 'roast-meat,' 'meat cooked on a spit.' *Bhūyishṭha*, see p. 4, l. 1, with note.

[3] 'Even in the night I cannot lie down comfortably (in my bed) through the dislocation of my joints by the galloping of the horse [or by my horse's pursuit of the game];' see p. 67, l. 6, and note 1. The above is the reading of all the Deva-nāgarī MSS. The Bengālī

[a] महन्ते एव्व पच्चूसे दासीएपुत्तेहिं सउणिलुद्धएहिं वणग्गहणकोलाहलेण पडिबोधिदोम्हि[1]। एत्तएण दाणिम्पि पीडा ण णिक्कमदि। तदो गण्डस्स उवरि पिडआ संवुत्ता[2]। हिओ किल अम्हेसु ओहीणेसु तत्तभवदो मिआणुसारेण अस्समपदं पविट्ठस्स तावसकण्णआ सउन्दला णाम मम अधण्णदाए दंसिदा[3]। सम्पदं णअरगमणस्स मणं

[a] महत्येव प्रत्यूषे दास्याःपुत्रैः शकुनिलुब्धकैर्वनग्रहणकोलाहलेन प्रतिबोधितोऽस्मि। इयतेदानीमपि पीडा न निष्क्रामति। ततो गण्डस्योपरि पिटका संवृत्ता। ह्यः किलास्मास्ववहीनेषु तत्रभवतो मृगानुसारेणाश्रमपदं प्रविष्टस्य तापसकन्यका शकुन्तला नाम ममाधन्यतया दर्शिता। साम्प्रतं नगरगमनाय मनः

---

have *turaga-gaānaṃ ća saddeṇa*, 'by the noise of horses and elephants.' *Kaṇḍ*, 'to separate grain from the husk,' 'bruise,' 'break,' is not so common as *khaṇḍ*. *Kaṇḍita-sandheḥ* agrees with the gen. *mama*, 'of me,' understood after *śayitavyam*. The instr. case is more usual after the fut. pass. part., but not more correct.

[1] 'Then at the very earliest dawn I am awakened by the din of taking the forest by the sons of slaves hunting the birds.' *Mahati pratyūshe*, lit. 'at great dawn' (cf. *mahā-rātra*, 'mid-night,' and the French 'de grand matin'). *Dāsyāḥ-putraiḥ* stands for *dāsī-putraiḥ*, and is to be regarded as one compound. According to Pāṇ. vi. 3, 22, the genitive in this compound is used in abusing and reviling (*ākrośe*); so *vṛishalyāḥ-putraiḥ* for *vṛishalī-putraiḥ*. *Vana-grahaṇa*, 'surrounding and taking possession of a wood for the purpose of hunting the animals it contains' (*mṛiga-grahaṇārtham*, K.) Those who do so are called, further on in this Act, *vana-grāhiṇaḥ* (=*vanāvarodhakāḥ*, K.), 'those who inclose a wood and obstruct the points of egress.'

[2] 'Even with all this my trouble does not come to an end; (for) afterwards upon the (old) boil [scar], (another) small boil is produced.' *Iyatā* =*etāvatā*, 'by this much,' 'by so much.' *Nishkrāmati*=*śāmyati*, 'ceases.' *Piṭakā*=*visphoṭaka*, 'a pustule,' 'a small boil,' 'a pimple.' This was probably a proverbial phrase, cf. *ayam aparo gaṇḍasya upari visphoṭaḥ*, Mudrā-r. p. 120, l. 14.

[3] 'For indeed yesterday, while we were left behind, a hermit's daughter, named S'akuntalā, through my ill-luck was presented to the

[a] कहम्पि ण करेदि । अज्जवि तस्स तं ज्जेव चिन्तअन्तस्स अक्खीसु पभादं आसि[1] । का गदी । जाव णं किदाचारपरिकम्मं पेक्खामि । ॥ इति परिक्रम्यावलोक्य च ॥ [b] एसो बाणासणहत्थाहिं जवणीहिं वणपुप्फमालाधारिणीहिं परिवुदो इदो एव्व आअच्छदि पिअवअस्सो । भोदु । अङ्गभङ्गविअलो विअ भविअ चिट्ठिस्सं[2] । जइ एव्वम्पि णाम विस्समं लहेअं ।

॥ इति दण्डकाष्ठमवलम्ब्य स्थितः ॥

[a] कथमपि न करोति । अद्यापि तस्य तामेव चिन्तयतोऽक्ष्णोः प्रभातमासीत् । का गतिः । यावदेनं कृताचारपरिकर्माणं प्रेक्षे । [b] एष बाणासनहस्ताभिर्यवनीभिर्वनपुष्पमालाधारिणीभिः परिवृत इत एवागच्छति प्रियवयस्यः । भवतु । अङ्गभङ्गविकल इव भूत्वा स्थास्यामि । यद्येवमपि नाम विश्रमं लभेय ।

---

view of his Highness, who had entered the grounds of the hermitage in pursuit of a deer,' i. e. it was all my ill-luck that made him see her. *Asmāsu avahīneshu* = *paśćāt patiteshu*, 'dropped behind,' 'fallen in the rear,' S.

[1] 'Even to-day (the light of) dawn (broke) upon the eyes (of him) thinking of that very (damsel);' i. e. according to Ć. *jāgrata eva rajanī nirgatā*, 'the night passed away whilst he was still awake.' K. remarks, 'By this it may be inferred that with thinking of her he had not closed his eyes all night.' *Akshṇoḥ*, i. e. *dṛiśor unmīlatoḥ satoḥ*, 'on his eyes being (still) open.' *Satoḥ* in the commentary shews that *akshṇoḥ* is locative dual.

[2] 'What is to be done? Meanwhile I will (be on the look out to) see him, when he has performed (his) usual toilet. Here comes my dear friend in this very direction, attended by Yavana women, having bows in their hands, and wearing garlands of wild-flowers. Be it so; I will stand as if crippled by paralysis of my limbs.' *Kā gatiḥ*, 'what resource!' i. e. what remedy or what expedient can be devised? This is a common phrase in Prākṛit; it occurs again in Act V. *Kidāćāra-parikammam* (= Sk. *kṛitāćāra-parikarmāṇam*) is the reading of one of the oldest MSS. [India Office, 1060], and of Ć. K. reads *pratikarmāṇam*; but *parikarma* and *pratikarma* have the same sense, viz. 'decoration after purification of the body,' 'rubbing it with perfumes after bathing.' Most of the Deva-n. MSS. have *parikkamam* for *parikramam*, 'circumambula-

॥ ततः प्रविशति यथानिर्दिष्टपरिवारो राजा ॥

राजा ।

कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनाश्वासि ।
अकृतार्थेऽपि मनसिजे रतिमुभयप्रार्थना कुरुते[1] ॥३५॥

---

tion.' *Yavanī*, properly a Muhammadan woman, a native of *Yavana* or Arabia, but applied also to a native of Greece. Wilson in the Vikramorvaśī (Act V, p. 261), where the same word occurs, remarks that Tartarian or Bactrian women may be intended. The business of these attendants was to act as the bearers of the king's bow and arrows. At the end of Act VI. a Yavanī enters again, *śārnga-hastā*, 'carrying a bow.' A commentator remarks, *Yavanī yuddha-kāle rājño 'straṃ dadāti*, 'the Yavanī in the time of war gives weapons to the king.' K. says, *Yavanī śastra-dhāriṇī*, 'the Yavanī is the weapon-bearer.' *Anga-bhanga*, properly 'palsy or paralysis of the limbs.' K. observes that the Vidūshaka here acts the *vishkambha*, which he defines as an *adhama-praveśakaḥ*, or inferior introductory scene, coming between two acts (*an-kayor madhya-vartī*), and performed by inferior actors (*nīća-pātra-prayojitaḥ*). Its object is to connect or bind together the story of the drama and the subdivisions of the plot (*kathā-sanghaṭṭanārtham*), by concisely alluding to what has happened in the intervals of the acts, or what is likely to happen at the end (*bhūtānām bhāvinām api sankshepeṇa sūćanāt*). In the following stage-direction, *daṇḍa-kāshṭha*=*yashṭi*, 'a stick,' 'staff of wood.' Translate, 'he stands leaning on a staff.'

[1] 'Granted my beloved is not easy to gain, still my heart encourages (itself) by observing her gestures (of love). Even though love has not accomplished its object, the desire of both (of us) gives [causes] enjoyment.' *Kāmam*, see p. 55, n. 3. *Na sulabhā*, i.e. from her relationship to the Ṛishi, K. *Tad-bhāva-darśanāśvāsi* is the reading of all the Beng. MSS. and of S'. The Deva-n. read *tad-bhāva-darśanāyāsi*, where *āyāsi* means 'active,' 'kept in activity.' But K., though the MS. gives *āyāsi*, explains it by *santushyati*, 'is cheered,' and by *āśvāsitam*, 'consoled.'

Verse 35. Āryā or Gāthā. See verse 2.

– – | ⏑ – ⏑ | ⏑ ⏑ – || ⏑ – ⏑ | – – | ⏑ – ⏑ | – – | ⏑
⏑ ⏑ – | – ⏑ ⏑ | ⏑ ⏑̇ – || ⏑ ⏑ ⏑ ⏑ | – – | ⏑ | – ⏑ ⏑ | –

॥ स्मितं कृत्वा ॥ एवमात्माभिप्रायसम्भावितेष्टजनचित्तवृत्तिः[1] प्रार्थयिता विडम्ब्यते । तद्यथा

स्निग्धं वीक्षितमन्यतोऽपि नयने यत्प्रेरयन्त्या तया
यातं यच्च नितम्बयोर्गुरुतया मन्दं विलासादिव ।
मा गा इत्यवरुद्धया यदपि सा सासूयमुक्ता सखी
सर्वं तत्किल मत्परायणमहो कामी स्वतां पश्यति[2] ॥३६॥

Bhāva=*śringāra-ćeshṭā*, 'the expression of amorous sentiments by gestures.' The gestures here referred to are described in the next verse, 36. *Darśana* is either 'seeing,' 'looking at' (=*avalokana*, S'.), or 'exhibiting,' 'shewing' (=*sākshāt-karaṇa*, K.) In the latter case, translate, 'by her exhibition of amorous gestures.' *Ubhaya* = *nāyaka-nāyikayoḥ* or *strī-purushayoḥ*. *Prārthanā*=*abhilāsha*, 'longing.'

[1] This is a long Bahuvrīhi comp., agreeing with *prārthayitā*. Translate, 'thus the suitor, who judges of the state of feeling of his beloved one by his own desires, is deluded.' *Evam*=*vakshyamāṇa-prakāreṇa*, 'in the following manner,' 'in the way about to be mentioned,' K. *Abhiprāya* =*abhilāsha*. *Sambhāvita*=*kalpita*, 'imagined,' or *śaṅkita*, 'suspected.' *Ishṭa-jana*=*manogata-vyakti*, 'the individual in one's thoughts.' *Prārthayitā*=*kāmukaḥ* or *yāćakaḥ*. *Viḍambyate*=*apahāsyate*, 'is mocked,' 'is made a fool of;' supply *kāmena*, 'by love.' The stage-direction *smitam kṛitvā* implies that he is to smile at his own folly in supposing that she was as fond of him as he was of her, merely because her gestures were coquettish.

[2] 'Whereas by her, even though casting her eyes in another direction, a tender glance was given [lit. it was looked tenderly]; and whereas by the weight of (her) hips she moved [lit. it was moved by her] slowly, as if from dalliance; and whereas by (her) detained in these (words), "Do not go" [see p. 52, l. 4], that friend was addressed with disdain; all that certainly had reference to me [or was directed at me]. Ah! (how) a lover discovers (what is) his own!' *Vīkshitam* is here the past pass. part., and *snigdham* an adverb, S'. *Avaruddhayā* or, according to some MSS., *uparuddhayā*=*kṛita-gamana-bādhayā* or *kṛita-gati-vyāghātayā*. *Matparāyaṇam*=*mad-vishayakam*, 'relating to me.' *Aho* here denotes wonder

---

Verse 36. SĀRDŪLA-VIKRĪḌITA (a variety of ATIDHṚITI). See verses 14, 30.

विदूषकः ॥ तथा स्थित एव[1] ॥

[a] भो वअस्स । ण मे हत्था पसरन्ति । ता वाआमेत्तेण जआबीअसि[2] ।

राजा ।

कुतोऽयं गात्रोपघातः ।

विदूषकः ।

[b] कुदो किल सअं अच्छी आउलीकरिअ अस्सुकारणं पुच्छेसि[3] ।

[a] भो वयस्य । न मे हस्तौ प्रसरतः । तद्वाचामात्रेण जाप्यसे । [b] कुतः किल स्वयमक्षिणी आकुलीकृत्याश्रुकारणं पृच्छसि ।

[1] 'Speak not so. Even she [the female Cakravāka], without her beloved, passes away the night made too long by sorrow. Expectation (of meeting again) makes the pain of separation, however severe, supportable.' *Gamayati*, lit. 'causes to go,' i. e. brings to an end. The Prākṛit *visāa* = *vishāda*, 'melancholy.' S'. explains the phrase by *visūraṇā-dīrghām*, *kheda-dīrghām*, *duḥkha-dustarām*. *Āśā-bandha*, 'hope,' i. e. *prātar mām sangamayishyati*, 'in the morning he will be united to me.' S'. makes this verse an example of the Āśvāsa Alan·kāra. K. refers to a parallel passage in the Megha-d. 10, *Āśā-bandhaḥ kusuma-sadṛiśaḥ* [sic] *prāyaśo hy an·ganānām sadyaḥ-pāti praṇayi hṛidayam viprayoge ruṇaddhi.*

[2] 'Having placed in front,' i. e. 'having introduced,' 'having presented.'

Verse 96. ĀRYĀ or GĀTHĀ. See verse 2.

– – | ⏑ ⏑ – | ⏑ ⏑ – || ⏑ – ⏑ | ⏑ ⏑ – | ⏑ – ⏑ | – ⏑ ⏑ | –
⏑ ⏑ – | ⏑ ⏑·⏑ ⏑ | – – || – – | – – | ⏑ | – – | ⏑

काश्यपः ।

अस्मान्साधु विचिन्त्य संयमधनानुच्चैःकुलं चात्मन-
स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम् ।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतःपरं न खलु तद्वाच्यं [1]वधूबन्धुभिः ॥९७॥

शार्ङ्गरवः ।

गृहीतः सन्देशः ।

---

[1] 'Having well considered us as rich in devotion, and the exalted family of thyself, and that (free) flow of affection of this (maiden) towards thee [or the spontaneous flow of affection springing up in you for her] not in any manner brought about by relatives; she is to be regarded by thee, as (one) amongst (thy) wives, after raising her to an equality of rank [or with equal respect]. Beyond this is dependent on destiny, nor indeed ought that to be called in question by a wife's relations.' *Saṃyama-dhanān*, 'this implies that they were worthy of respect,' K. *Uććaiḥ-kulam*, &c., 'this implies that he would act with justice,' K.; see p. 15, n. 1. *Kathamapi=dur-graheṇa*, S'. and C'. Cf. p. 131, l. 6. *A-bāndhava-kṛitām*, see p. 127, n. 3. *Sneha-pravṛittim=prema-ćeshṭām*, C'. *Sāmānya-pratipatti-pūrvakam=sādhāraṇa-gaurava-puraḥsaram*, 'preceded by equal respect;' *yādṛiśena gauraveṇa aparā vadhūr ālokyate tādṛiśena iyam*, &c., S'. *Pratipatti* is either 'the act of preferring to rank,' or 'the respect paid to rank.' *Pūrva* or *pūrvaka* at the end of a compound often simply denotes the manner in which anything is done, translateable by 'with' or 'after' (cf. *sa bhavantam anāmaya-praśna-pūrvakam idam āha*, p. 198, l. 2; also p. 116, n. 2). *Dāreshu*, S'. explains thus, *dāra-śabdaḥ puṃ-lingaḥ kalatra-vāćako nitya-bahuvaćanāntaḥ*, 'the word *dāra*, meaning a wife, is of the masculine gender, and always has a plural termination.' *Dārāḥ* therefore may be either wives or wife. *Ataḥ-param*, &c., 'here he tells the reason why he does not demand higher rank or greater honour for S'akuntalā,' S'. In the first line, my own MS. reads *asmān sādhu samīkshya saṃyama-parān*. All marriages in the East are arranged by the relatives of the parties.

Verse 97. ŚĀRDŪLA-VIKRĪḌITA (a variety of ATIDHṚITI). See verses 14, 30, 36, 39, 40, 63, 79, 85, 86, 89.

काश्यपः ।

वत्से । त्वमिदानीमनुशासनीयासि । वनौकसोऽपि सन्तो लौकिकज्ञा[1] वयम् ।

शार्ङ्गरवः ।

न खलु धीमतां कश्चिदविषयो नाम[2] ।

काश्यपः ।

सा त्वमितः पतिकुलं प्राप्य
शुश्रूषस्व गुरून्कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः[3] ॥९८॥

कथं वा गौतमी मन्यते ।

---

[1] 'We (are) acquainted with worldly affairs,' 'we know the ways of the world' (=*loka-vyavahāra-jñāḥ*, S'.)

[2] 'There is no subject out of the reach [*agoćaraḥ*, S'.] of the intelligent,' i.e. wise men are conversant with all subjects.

[3] 'Pay respectful attention to (thy) superiors. Act the part of a dear friend towards (thy) fellow-wives [rival wives]. Even though wronged [treated harshly] by thy husband, do not out of anger shew [go to] a refractory-spirit. Be ever courteous towards (thy) attendants; not puffed up [arrogant] in prosperity—in this manner young-women attain the station [title] of housewife [matron]. Those of an opposite character are house-banes [banes of the family].' The Sāhit.-d. p. 185 adduces this as an example of the figure Upadishṭa, which is defined as *manohāri vākyam śāstrānusārataḥ*. S'. quotes the following aphorism, *Parisaṅgṛihya śāstrārthaṃ yad vākyam abhidhīyate vidvan manoharaṃ jñeyam upadishṭaṃ tad eva tu*. *Gurūn*=*svaśurādīn*, 'father-in-law,' &c., C. A Guru is not only a father or a father-in-law, but also a preceptor, and in fact any male relation entitled to *gaurava*, 'respect.' *Śuśrūshasva*=*ārādhaya*. *Vṛittim*, some of the Beng. and the Sāhit.-d., supported by S'., read *vṛittam*

Verse 98. ŚĀRDŪLA-VIKRĪḌITA (a variety of ATIDHṚITI). See verses 14, 30, 36, 39, 40, 63, 79, 85, 86, 89, 97.

गौतमी ।

[a] एत्तिओ वहूजणस्स उवदेसो । जादे । एदं क्खु सव्वं ओधारेहि[1] ।

काश्यपः ।

वत्से । परिष्वजस्व मां सखीजनं च ।

शकुन्तला ।

[b] तात । इदो एव्व किं पिअंवदामिस्साओ[2] सहीओ णिवत्तिस्सन्ति ।

काश्यपः ।

वत्से । इमे अपि प्रदेये[3] । न युक्तमनयोस्तत्र गन्तुम् । त्वया सह गौतमी यास्यति ।

शकुन्तला ॥ पितरमाश्लिष्य ॥

[c] कहं दाणिं तादस्स अङ्कादो परिब्भट्ठा मलअतडुम्मूलिआ

[a] एतावान्वधूजनस्योपदेशः । जाते । एतत्खलु सर्वमवधारय । [b] तात । इत एव किं प्रियंवदामिश्राः सख्यो निवर्तिष्यन्ते । [c] कथमिदानीं तातस्याङ्कात्परिभ्रष्टा मलयतटोन्मूलिता

=*cāritram*, 'action,' 'deed,' 'behaviour,' 'demeanour.' *Viprakṛitā*=*pīḍitā*, C.;=*kṛita-vipriyā*, 'offended,' S'. *Pratīpam*=*prātikūlyam*. *Bhūyishṭham*=*atiśayena*. *Dakshiṇā*=*sa-snehā*. *Bhāgyeshu*, the Beng. and S'. have *bhogeshu*=*sukheshu*, 'in enjoyments,' 'in pleasures,' in which case *anutsekinī* will mean 'not given to excess.' The latter word is literally 'spouting up' like a fountain. Compare *anutseko lakshmyām*, Bhartṛi-h. ii. 54. *Padam*=*śabdam*, 'a title,' S'.;=*vyavasāyam* or *pratishṭhām*, C. *Vāmāḥ*=*tad-viparīta-kāriṇyaḥ*, S'.;=*tad-viruddhāḥ*, C.

[1] 'Lay to heart,' 'treasure up in thy heart,' 'ponder well.'

[2] 'Priyaṃvadā and my other dear friends;' cf. *Śārn-garava-miśrāḥ*, p. 151, l. 7, with note. My own MS. and two others insert *kim*.

[3] 'Are to be given away in marriage.' Cf. p. 48, l. 10, with note thereon. *Ime api*; the dual terminations *ī*, *ū*, *e* do not coalesce with following vowels, see Gram. 38; Pāṇ. i. 1, 11.

[1] चन्दणलदा विअ देसन्तरे जीविअं धारइस्सं ।

काश्यपः ।

वत्से । किमेवं कातरासि ।

अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला ।
तनयमचिरात्प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि[2] ॥९९॥

॥ शकुन्तला पितुः पादयोः पतति ॥

[a] चन्दनलतेव देशान्तरे जीवितं धारयिष्यामि ।

---

[1] 'How now, removed from my foster-father's side, like a tendril of the sandal-tree uprooted from the slopes of Malaya, shall I support life in a strange place?' The Candana or sandal tree (σάνταλον), Sirium Myrtifolium, is 'a large kind of myrtle with pointed leaves,' the wood of which affords many highly esteemed perfumes, unguents, &c., and is celebrated for its delicious scent. It is found chiefly on the slopes [*taṭa*, *upatyakā*, Raghu-v. iv. 46, 48] of the Malaya mountains, which are thence called *ćandanāćala*, the tree being sometimes called *Malaya-ja*, 'Malaya-born.' Frequent allusion is made to this tree being infested by snakes (see Raghu-v. iv. 48; Hitop. l. 1582). *Tara*, of which the Sanskrit equivalent is probably *taṭa*, is the reading of all the Deva-n. MSS. It is synonymous with *utsanga*, 'the slope of a hill,' so that *Malayasya utsangāt* exactly answers to *tātasya-ankāt* [*anka*=*utsanga*, Amara-k. iv. 1, 4]. *Ḍ* and *r* are certainly interchangeable in Sanskrit and Prākrit, and the substitution of *ḍ* for *ṭ* is usual. *L*, however, is the more common substitute, and it might be supposed that *Malaya-tara* was for *Malaya-tala*=*Malayasya upatyakā*, Raghu-v. iv. 46.

[2] 'Stationed in the honourable post of wife to a nobly-born husband; (and) incessantly [every moment] distracted with his affairs important from his dignity; having very shortly given birth to a pure son, like as the Eastern-quarter (gives birth to) the Sun, thou wilt not take account, O daughter, of the sorrow produced by separation from me.' *Abhijana-*

Verse 99. HARIṆĪ (a variety of ATYASHṬI). See verse 66

काश्यपः ।

यदिच्छामि ते तदस्तु ।

शकुन्तला ॥ सख्यावुपेत्य ॥

[a] हला । दुवेवि मं समं एव्व परिस्सजह ।

सख्यौ ॥ तथा कृत्वा ॥

[b] सहि । जइ णाम सो राआ पच्चहिण्णाणमन्थरो भवे । तदो से इमं अत्तणामहेअङ्किअं[1] अङ्गुलीअअं दंसेहि ।

शकुन्तला ।

[c] इमिणा सन्देहेण वो आकम्पिदम्हि ।

सख्यौ ।

[d] मा भाआहि । अदिसिणेहो[2] पावसङ्की ।

शार्ङ्गरवः ।

युगान्तरमारूढः[3] सविता । त्वरतामत्रभवती ।

[a] हला । द्वे अपि मां सममेव परिष्वजेथाम् । [b] सखि । यदि नाम स राजा प्रत्यभिज्ञानमन्थरो भवेत् । ततोऽस्मा इदमात्मनामधेयाङ्कितमङ्गुलीयकं दर्शय । [c] अनेन सन्देहेन वामाकम्पितास्मि । [d] मा बिभीहि । अतिस्नेहः पापशङ्की ।

---

vato=*kulīnasya*, see p. 15, n. 1. *Ākulā*=*vyagrā*, 'perplexed,' 'intently occupied,' S'.;=*sasambhramā*, 'bewildered,' K. *Aćirāt*=*gamanāvyavahita-samaye*, 'immediately on thy arrival.' *Prāći iva*, &c.=*yathā pūrva-dik pavitra-janakam sūryam*, S'.

[1] *Ātmanāmadheyānkita*, see p. 53, notes 2 and 3, and p. 140, l. 9, with note 2.

[2] 'Excessive affection is apt to suspect evil.' *Ati-snehaḥ*, so reads the Taylor MS. as well as my own, supported by K. S'. observes, *tathā ćoktam kirāte, prema paśyati bhayāni apade 'pi*, 'and so it is said in the Kirātārjunīya, "Affection sees causes of alarm [or dangers], even without foundation."' (See Kirāt. ix. 70.)

[3] 'The sun has ascended to another division (of the sky).' The Mackenzie MS. has *yugāntam adhirūḍhaḥ;* the Calcutta edition, ***dūram adhirūḍhaḥ;*** Chézy, *gagaṇāntaram adhirūdhaḥ*. According to C., ***yuga***

शकुन्तला ॥ आश्रमाभिमुखी स्थित्वा ॥

[a] ताद । कदा णु भूओ तवोवणं पेक्खिस्सं ।

काश्यपः ।

श्रूयताम् ।

भूत्वा चिराय चतुरन्तमहीसपत्नी
दौष्यन्तिमप्रतिरथं तनयं निवेश्य ।
भर्त्रा तदर्पितकुटुम्बभरेण सार्धं
शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन् ॥१००॥

[a] तात । कदा नु भूयस्तपोवनं प्रेक्षिष्ये ।

---

is by some considered equivalent to *prahara*, 'a division of the day, comprising one-eighth of the sun's diurnal revolution, or three hours;' by others, to *hasta-ćatushṭaya*, 'a space of four cubits.' Dr. Boehtlingk translates, 'The sun has already entered the afternoon-quarter of the heavens.'

[1] 'Having become for a long time the fellow-wife of the Earth bounded by the four cardinal-points, having settled-in-marriage thy matchless-warrior son Daushyanti, in-company-with thy husband (Dushyanta), who shall have (first) transferred the cares of government [the burthen of family-cares] to him, thou shalt again set foot in this tranquil hermitage.' *Ćatur-anta-mahī* seems to be equivalent to *ćatur-dig-anta-mahī*, i. e. 'the earth as far as the four quarters,' 'the entire earth.' The Beng. have a parallel phrase *sa-dig-anta-mahī*. K. explains it by *ćatvāraḥ antāḥ yasyāḥ sā*. Cf. p. 124, l. 4. *Daushyanti* is a regular patronymic, from Dushyanta, as Dākshi, 'a descendant of Daksha,' from Daksha; Aindri from Indra, &c. (see Gram. 81. X). *A-pratiratham*=*asat-paripanthinam*, 'having no antagonist,' =*a-pratirathikam*, K.; *ratha* being put for *rathika* or *rathin*, 'a warrior who fights from a chariot.' *Niveśya*=*vivāhya*, 'having caused to marry,' K.; *niviś* has this sense in Mahā-bh. i. 7138. *Tad* refers to *Daushyanti*. *Arpita*, &c., cf. *aham api sūnau vinyasya rājyam*, Vikram., Act V; also

Verse 100. VASANTA-TILAKĀ (a variety of ŚAKVARĪ). See verses 8, 27, 31, 43, 46, 64 74, 80, 82, 83, 91, 93, 94, 95.

गौतमी ।

[a] जादे । परिहीअदि गमणवेला । णिवत्तेहि पिदरं । अहवा चिरेणवि पुणो पुणो एसा एव्वं मन्तइस्सदि । णिवत्तदु भवं ।

काश्यपः ।

वत्से । उपरुध्यते तपोऽनुष्ठानम्[2] ।

शकुन्तला ॥ भूयः पितरमाश्लिष्य ॥

[b] तवच्चरणपीडिदं तादसरीरं । ता मा अदिमेत्तं मम किदे उक्कण्ठ[3] ।

[a] जाते । परिहीयते गमनवेला । निवर्तय पितरम् । अथवा चिरेणापि पुनः पुनरेषैवं मन्त्रयिष्यते । निवर्ततां भवान् । [b] तपश्चरणपीडितं तातशरीरम् । तन्मातिमात्रं मम कृते उत्कण्ठस्व ।

Manu vi. 2, 3, 'When the father of a family perceives his own wrinkles and grey hair, committing the care of his wife to his sons, or accompanied by her, let him repair to the woods,' i. e. let him enter upon the third quarter of his life, that of a hermit (see p. 157, n. 1 at the end). *Śānte*, cf. p. 20, l. 12. *Karishyasi padam*, cf. p. 145, n. 2 at the end.

[1] 'Allow the father to return; or rather, (since) even for a long time she will go on talking again and again in this manner, let your reverence return,' i. e. return at once yourself, without asking her permission. To depart without asking leave, is contrary to all Hindū ideas of politeness. *Athavā*, see p. 30, n. 3.

[2] 'The prosecution of (my) devotions is interrupted (by this detention).' Compare in Vikram., Act V, *uparudhyate me āśrama-vāsa-dharmaḥ*.

[3] 'Therefore do not beyond measure sorrow on my account.' *Ukkaṇṭha* for Sanskṛit *utkaṇṭha* or *utkaṇṭhasva* is the reading of my own MS. *Mā ukkaṇṭhidum* seems questionable. K. has *Bhūyo 'pi tapaś-ćaraṇa-pīḍitaṃ tātasya śarīram atimātram mama kṛite utkaṇṭhitam bhavishyati*.

काश्यपः ॥ सनिःश्वासम् ॥

शममेष्यति मम शोकः कथं नु वत्से त्वया चरितपूर्वम्[1]
उटजद्वारविरूढं नीवारबलिं विलोकयतः ॥१०१॥

गच्छ । शिवास्ते पन्थानः सन्तु ।

॥ निष्क्रान्ता शकुन्तला सहयायिनश्च ॥

---

[1] 'How, my child, will the grief of me, looking at the oblation of rice-grains formerly offered by thee, germinating at the door of the cottage, ever be assuaged [ever go to assuagement]?' *Ćarita*, so reads the Colebrooke MS.; the others have *raćita-pūrvam=purā-vihitam*, S. *Ćarita* is supported by *ćaru*, 'an oblation of rice.' The *bali*, or *gṛiha-bali*, is a particular kind of offering, identical with the *bhūta-yajña*, i.e. a sacrifice for all creatures, but especially in honour of those demigods and spiritual beings called *gṛiha-devatāḥ*, 'household deities,' which are supposed to hover round and protect households (Manu iii. 80), or to whom some particular part of the house is sacred. This offering was made by throwing up into the air (Manu iii. 90), in some part of the house, generally at the door (Manu iii. 88), the remains of the morning and evening meal of rice or grain; uttering at the same time a *mantra* or prayer to some of the inferior deities, according to the place in which it was made (Manu iii. 87, &c.), whether to Indra with his followers the Maruts, or to Kuvera with his followers the Guhyakas, Kinnaras, Yakshas, &c., or to the spirits of trees, waters, &c. (Manu iii. 88, 89). According to Colebrooke it might be presented with the following Paurāṇik prayer, 'May gods, men, cattle, birds, demigods, benevolent genii, serpents, demons, departed spirits, blood-thirsty savages, trees, and all who desire food given by me—may reptiles, insects, flies, and all hungry beings or spirits concerned in this rite, obtain contentment from this food left them by me!' It was sometimes offered by the women of the house, who might assist in any sacrifice, provided they abstained from repeating the Mantras (Manu iii. 121), and as the offering was intended for all creatures, even the animals were supposed to have their share in it (Manu iii. 92). In point of fact the crows, dogs, insects, &c. in the neighbourhood of the house were the real consumers of it (whence *bali-pushṭa*, *bali-bhuj*, *gṛiha-bali-bhuj*, as names

---

Verse 101. ĀRYĀ or GĀTHĀ. See verse 2.

⏑ ⏑ – | ⏑ ⏑ ⏑ ⏑ | – – || ⏑ – ⏑ | – – | ⏑ – ⏑ | ⏑ ⏑ – | –
⏑ ⏑ – | – ⏑ ⏑ | – – || – – | ⏑ ⏑ – | ⏑ | – ⏑ ⏑ | –

सख्यौ ॥ शकुन्तलां विलोक्य ॥

[a] हद्धी हद्धी । अन्तलिहिदा[1] सउन्दला वणराईए ।

काश्यपः ॥ सनिःश्वासम् ॥

अनसूये । गतवती वां सहधर्मचारिणी । निगृह्य शोकमनुगच्छतं मां प्रस्थितम् ।

उभे ।

[b] ताद । सउन्दलाविरहिदं सुण्णं विअ तवोवणं कहं पविसामो ।

काश्यपः ।

स्नेहप्रवृत्तिरेवंदर्शिनी[2] । ॥ सविमर्शं परिक्रम्य ॥ हन्त[3] भोः । शकुन्त-

[a] हा धिक् हा धिक् । अन्तर्हिता शकुन्तला वनराज्या । [b] तात । शकुन्तलाविरहितं शून्यमिव तपोवनं कथं प्रविशावः ।

---

of a crow, crane, sparrow, &c., compare Hitop. l. 1076), and such of the grains as escaped being devoured by them would be likely to germinate about the threshold. This *bali* formed one of the five great religious rites, sometimes called sacraments, which the householder who maintained a perpetual fire (see p. 148, n. 1) had daily to perform (Manu iii. 67, iv. 21). See Indian Wisdom, pp. 203, 251. It was in honour of all creatures of every description, but particularly of those not provided for by the other four sacrifices. It might have reference, however, to the deities and beings honoured in the other sacraments. That it had especial reference to the *Gṛiha-devatāḥ* is indicated in Manu iii. 117, with commentary; and in the Mṛićchakaṭikā, where Ćārudatta, after fulfilling the Deva-kārya, or second of the five rites (cf. p. 140, l. 17), is described as offering the *balī* to the household gods around the threshold. His speech, as he offers it, corresponds remarkably with that of Kāśyapa, *Yāsām baliḥ sapadi mad-gṛiha-dehalīnām, haṉsaiś ća sārasa-gaṇaiś ća vilupta-pūrvaḥ, tāsv eva samprati virūḍha-tṛiṇāṅkurāsu, vījāñjaliḥ patati kīṭa-mukhāvalīḍhaḥ.* See Mṛićch., Act I, verse 1. For *śivās te panthānaḥ santu*, in the next line, see p. 163, n. 1 at the end.

[1] So read all the Deva-n. for *antarihidā*, cf. p. 140, l. 6.

[2] 'The course of affection views it thus.' The Beng. MSS. have *sneha-vṛittir*, and one (I. O. 1050) *evaṃ śaṉsinī* for *evaṃ darśinī*. *Yasmin vishaye sneho bhavati tad-asānnidhyād etādriśa eva kramo bhavati*, Ś.

[3] *Hanta*, here an exclamation of joy (*harshe*, Ś.)

त्वां पतिकुलं विसृज्य लब्धमिदानीं स्वास्थ्यम्[1]। कुतः।

अर्थो हि कन्या परकीय एव
तामद्य सम्प्रेष्य परिग्रहीतुः ।
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा[2] ॥१०२॥

॥ इति निष्क्रान्ताः सर्वे ॥

॥ चतुर्थोऽङ्कः ॥

---

[1] 'My natural serenity of mind,' 'my natural good spirits.' A load of anxiety is taken off my mind.

[2] 'Verily a girl is another's property. Having to-day sent her to her husband, this my conscience has become quite clear, as if (after) restoring a deposit.' *Kanyā-rūpo 'rthaḥ*, &c., 'the property consisting of a girl belongs to another,' Ś. and Ć. *Parigrahītuḥ=pariṇetuḥ*. Hence *parigraha*, 'a wife,' see p. 124, l. 3. The ceremonies of marriage are described by Colebrooke in the Asiatic Researches, vol. vii. pp. 288–311, thus:—The bridegroom goes in procession to the house of the bride's father. The bride is given to him by her father, and their hands, on which turmeric has been previously rubbed, are bound together with Kuśa grass. The bridegroom next makes oblations to the sacred household fire, and the bridegroom drops rice into it. The bridegroom solemnly takes her hand in marriage (whence he is called *pāṇi-grahītṛi*, and marriage *pāṇi-grahaṇa*), and leads her round the sacred fire (whence he is called *pariṇetṛi*). The bride steps seven times, and the marriage is then irrevocable. *Viśadaḥ=prasannaḥ*, 'serene,' 'tranquil,' K.; *=susthaḥ*, Ś. Cf. *manasaḥ prasādaḥ*, Vikram., Act V. *Prakāmam=atyartham*, see p. 108, n. 3. The Beng. reading is *jāto 'smi samyag viśadāntarātmā, ćirasya nikshepam ivārpayitvā.*

Verse 102. INDRA-VAJRĀ (a variety of TRISHṬUBH), containing eleven syllables to the Pāda or quarter-verse, each Pāda being alike.

– – ⏑ – – ⏑ ⏑ – ⏑ – – ||

॥ अथ पञ्चमोऽङ्कः ॥

॥ ततः प्रविशत्यासनस्थो[1] राजा विदूषकश्च ॥

विदूषकः ॥ कर्णं दत्त्वा ॥

[a] भो भो वअस्स । सङ्गीदसालन्तरे अवधाणं देहि । कलविसुद्धाए गीदीए सरसञ्जोओ सुणीअदि[2] । जाणे । तत्तहोदी हंसवदिआ वण्णपरिअअं करेदि[3]त्ति ।

राजा ।

तूष्णीं भव । यावदाकर्णयामि ।

[a] भो भो वयस्य । सङ्गीतशालान्तरेऽवधानं देहि । कलविशुद्धायां गीत्यां स्वरसंयोगः श्रूयते । जाने । तत्रभवती हंसपदिका वर्णपरिचयं करोतीति ।

---

[1] In the Beng. MSS. the speech of the Chamberlain at p. 186 commences the Act.

[2] 'Turn (thy) attention to the interior of the music-hall. In a soft and clear song harmonious sounds are heard [the union of notes is heard].' *Īśvarāṇāṃ yatra nṛityādikam bhavati sā saṅgīta-śālā*, 'a music-saloon is a place where dancing &c. is performed before princes,' S'. *Avadhānam*, K. has *avadhāraṇam*. *Gītyām=dhruvāyām*, K. Prākṛit *gīdie* may stand for instr., gen., or loc. cases. *Svara-saṃyoga*, K. has *svara-yoga*. Both expressions occur in Mṛićch. (p. 33, l. 2; p. 94, l. 1; p. 222, l. 5; p. 339, l. 9), and in the Mālavik. (p. 67, l. 6, with note).

[3] 'Is practising singing,' lit. 'is making acquaintance with the Varṇas.' *Paric̒aya=abhyāsa*, C'. *Varṇa*, 'the order or arrangement of a song.' It may also mean 'a musical mode.' These modes are numerous, personified either as male (Rāga) or female (Rāgiṇī). According to S'. and C'., the Varṇas intended here are of four kinds, the first two corresponding with the division of the Bhāvas, or 'affections.' *Gītishu c̒atvāra varṇā bhavanti yad āha Bharataḥ, Sthāyī tathaiva Sañc̒ārī tathā Rohāvarohiṇau. Varṇāś c̒atvāra evaite kathitāḥ sarva-gītishu.*

॥ आकाशे गीयते ॥

[a] अहिणवमहुलोलुवो तुमं
तह परिचुम्बिअ चूअमञ्जरिं।
कमलवसइमेत्तणिव्वुदो
महुअर विम्हरिदोसि णं कहं ॥१०३॥

राजा।

अहो रागपरिवाहिणी गीतिः[2]।

[a] अभिनवमधुलोलुपस्त्वं तथा परिचुम्ब्य चूतमञ्जरीम्।
कमलवसतिमात्रनिर्वृतो मधुकर विस्मृतोऽस्येनां कथम्॥

---

[1] 'O Bee, how (can it be) that thou, eagerly-longing for fresh honey, after having so kissed the mango-blossom, shouldst (now) be forgetful of it, being altogether satisfied with (thy) dwelling in the lotus!' *Ćūta-mañjarī=āmra-kalikā*, S'. Cf. in Vikram., Act II, *Īshad-baddha-rajaḥ-kaṇāgra-kapiśā ćūte navā mañjarī.* *Kamala-vasati=kamalāvasthiti*, C'. The fondness of the bee (which in Sanskrit is masculine) for the lotus is so great that he will remain for a long time in the interior of the flower. Cf. *na paṅkajaṃ tad yad alīna-shaṭpadam*, 'that is not a lotus which has no bee clinging to it,' Bhaṭṭi-k. ii. 19; also *guñjad-dvirepho 'yam ambuja-sthaḥ*, 'the murmuring bee remaining in the lotus,' Ṛitu-s. vi. 15; and *idaṃ ruṇaddhi mām padmam antaḥ-kvaṇita-shaṭpadam*, Vikram., Act IV. *Madhu-kara*, see p. 33, n. 1. *Vismṛita*, see p. 161, n. 3. In Prākṛit, two forms *mar* and *sumar* are used for *smṛi;* the first becomes *mhar* after a preposition (as in *vimhao* for *vismayaḥ*, Vararući iii. 32); but *vimarido* would be equally correct according to Vararući iii. 56. K. observes that, under the figure of a bee, Hansapadikā covertly reproves the king for having forgotten her. S'. and C'. call this verse a *Praććhādaka*, and the following from Kavi-kaṇṭhahāra is quoted, *anyāsaktam patim matvā prema-vićcheda-manyunā vīṇā-puraḥsaraṃ gānaṃ striyāḥ praććhādako mataḥ.*

[2] 'Oh, what an impassioned strain!' lit. a song overflowing with affection or passion. *Rāga-parivāhiṇī=anurāga-nishyandinī*, S'.;=*kāma-sampūrṇā*, K. Cf. p. 89, n. 3.

Verse 103. APARA-VAKTRĀ. See verse 90.

विदूषकः ।

[a] किं दाव गीदीए अवगदो अक्खरत्थो[1] ।

राजा ॥ स्मितं कृत्वा ॥

सकृत्कृतप्रणयोऽयं जनः । तदस्या देवीं वसुमतीमन्तरेण महदुपालम्भनं गतोऽस्मि[2] । सखे माठव्य । मद्वचनादुच्यतां हंसपदिका । निपुणमुपालब्धोऽस्मीति ।

विदूषकः ।

[b] जं भवं आणवेदि । ॥ उत्थाय ॥ [c] भो वअस्स । गहीदस्स ताए परकीएहिं हत्थेहिं सिहण्डए ताडीअमाणस्स अच्छराए वीदराअस्स विअ णत्थि दाणिं मे मोक्खो[3] ।

[a] किं तावद्गीत्या अवगतोऽक्षरार्थः । [b] यद्भवानाज्ञापयति । [c] भो वयस्य । गृहीतस्य तया परकीयैर्हस्तैः शिखण्डके ताड्यमानस्याप्सरसा वीतरागस्येव नास्तीदानीं मे मोक्षः ।

---

[1] 'The meaning of the words,' lit. 'of the letters or syllables.'

[2] 'This person [i. e. I] once made love (to her); therefore I am incurring her severe censure on account of the queen Vasumatī.' *Kṛita-praṇayaḥ = kṛita-premā. Ayaṃ janaḥ*, i. e. *mad-rūpaḥ*, 'consisting of me,' S'. Cf. p. 144, n. 2. *Vasumatī* is a name for the earth, cf. p. 124, n. 1. *Antareṇa*, with accusative, see p. 81, n. 2. After *kṛita-praṇayo 'yaṃ janaḥ*, the Calcutta edition adds *ity aksharārthaḥ*, 'such is the meaning of the words.'

[3] 'There is not now any liberation for me (suffered to be) seized by her with the hands of others by-the-hair-on-the-crown-of-my-head (and) beaten, any more than for a sage-with-suppressed-passions (if taken unawares) by a lovely-nymph.' *Śikhaṇḍaka* is 'the lock of hair left on the crown of the head at tonsure.' This was the only portion of hair suffered to remain on the head of a Brāhman; but in the case of the military class, three or five locks, called *kāka-pakshāḥ*, were left on each side. The two ceremonies of tonsure are included by Manu among the twelve S'aṇskāras or rites which every Brāhman had to undergo. The first, or *ćūḍā-karaṇa*, took place from one to three years old, generally after teething (Manu ii. 35); the second, or final tonsure *keśānta*, in the sixteenth year from conception (ii. 65). *Moksha* has here a double sense, 'liberation of the body

राजा ।

गच्छ । नागरिक[1]वृत्त्या सञ्ज्ञापयैनाम् ।

विदूषकः ।

[a]का ग[2]ई । ॥ इति निष्क्रान्तः ॥

राजा ॥ आत्मगतम् ॥

किं नु खलु गीतार्थमाकर्ण्येष्टजनविरहादृतेऽपि बलवदुत्कण्ठितोऽस्मि । अथवा ।

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दा-
न्पर्युत्सुकीभवति यत्सुखितोऽपि जन्तुः ।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौ[3]हृदानि ॥१०४॥

॥ इति पर्याकुलस्तिष्ठति ॥

[a] का गतिः ।

---

from danger,' and 'liberation of the soul from further transmigration;' see n. 3 below. The last was the great object of sages and devotees in their bodily mortifications, but was often obstructed by the seductive artifices of Indra's nymphs (see p. 45, n. 1).

[1] 'In the courtly [fashionable] style.' *Pravīṇasya rityā*, K. *Nāgarika* here means more than 'polite.' It implies 'insincerity,' as when a man shews exaggerated attention to his first mistress, while he is courting some one else.

[2] *Kā gatiḥ*, see p. 62, l. 2, with note 2.

[3] 'When a being (in other respects) happy becomes conscious-of-an ardent-longing on seeing charming objects and hearing sweet sounds, then in all probability, without being aware of it, he remembers with his mind the friendships of former births, firmly-rooted in his heart.' *Ramyāṇi*, i.e. *vastūni*, S'. For *ramyāṇi* K. has *rūpāṇi* and *sthitāni* for *sthirāṇi*. *A-bodha-pūrvam*, 'without any previous intimation or suggestion,' 'unconsciously.' Compare the similar expressions, *a-mati-pūrvam*, *a-buddhi-pūrvam*, 'without any previous idea.' The doctrine of transmigration is an essential dogma

---

Verse 104. VASANTA-TILAKĀ (a variety of ŚAKVARĪ). See verses 8, 27, 31, 43, 46, 4, 74, 80, 82, 83, 91, 93, 94, 95, 100.

॥ ततः प्रविशति कञ्चुकी ॥

कञ्चुकी[1]।

अहो नु खल्वीदृशीमवस्थां प्रतिपन्नोऽस्मि।

आचार इत्यवहितेन मया गृहीता
या वेत्रयष्टिरवरोधगृहेषु राज्ञः।
काले गते बहुतिथे मम सैव जाता
प्रस्थानविक्लवगतेरवलम्बनार्थम्[2] ॥१०५॥

---

of the Hindū religion; see Indian Wisdom, p. 67. Dim recollections of occurrences in a former life are supposed occasionally to cross the mind, and the present condition of every person is supposed to derive its character of happiness or misery, elevation or degradation, from the virtues or vices of a previous state of being. The consequences of actions in a former birth are called *vipāka*.

[1] The Kańćukin or Chamberlain was the attendant on the women's apartments. S′. and C′. quote the following from Bharata: *Antaḥpura-ćaro vṛiddho vipro guṇa-gaṇānvitaḥ sarva-kāryārtha-kuśalaḥ kańćukīti abhidhīyate. Jarā-vaiklavya-yuktena viśed gātreṇa kańćukī*, 'the character styled Kańćukin is an attendant in the inner apartments, an old man, a Brāhman, endowed with numerous good qualities, and a clever man of business. The Kańćukin should enter with a body decrepit and tottering from age.' Compare this scene, and the speeches of the Chamberlain, with the opening scene of Act III. of Vikram.

[2] 'The wand [staff of office] which was assumed by me, having to watch over the royal female apartments, thinking, "It is a matter of form," much time having elapsed since then, that same (wand) has become (indispensable, or a useful crutch) for the support of me whose step falters in walking.' *Vetra-yashṭi*, properly 'a cane-stick,' used as a badge of office, like the gold stick or black rod in European courts. *Avahitena*, lit. 'attentive,' 'careful,' 'watchful,' i. e. appointed to a careful superintendence or watch. So read all the Deva-n.; the Beng., with S′., have *adhikṛitena*, i. e. 'by me set over,' &c. *Avarodha-gṛiheshu*, see p. 21, n. 3. *Bahutithe* = *bahu-sankhye*, Chézy. K. observes that *bahu* is here treated as a numeral, *titha* being a kind of ordinal suffix (Gram. p. 66. LXIII).

Verse 105. Vasanta-tilakā (a variety of Śakvarī). See verses 8, 27, 31, 43, 46, 64, 74, 80, 82, 83, 91, 93, 94, 95, 100, 104.

भोः । कामं धर्मकार्यमनतिपात्यं देवस्य । तथापीदानीमेव धर्मासनादुत्थितस्य पुनरुपरोधकारि कण्वशिष्यागमनमस्मै नोत्सहे निवेदयितुम् । अथवा । अविश्रामोऽयं लोकतन्त्राधिकारः । कुतः ।

भानुः सकृद्युक्ततुरङ्ग एव
रात्रिन्दिवं गन्धवहः प्रयाति ।
शेषः सदैवाहितभूमिभारः
षष्ठांशवृत्तेरपि धर्म एषः ॥१०६॥

यावन्नियोगमनुतिष्ठामि । ॥ परिक्रम्यावलोक्य च ॥ एष देवः ।

प्रजाः प्रजाः स्वा इव तन्त्रयित्वा
निषेवते श्रान्तमना विविक्तम् ।

---

[1] 'But (why should I hesitate?) this office of supporting the world does not (admit of) repose.' *Athavā*, see p. 30, n. 3. *Loka-tantra*, one meaning of *tantra* is 'supporting a family.'

[2] 'Because the Sun having but once (and once) only yoked his steeds travels onwards; night and day the wind (also travels); S'esha has the burden of the earth always resting (on his head). This also is the duty of him whose subsistence is on the sixth part (of the produce of the soil).' *Kutaḥ*, see p. 55, n. 2. *Bhānu*, 'the Sun;' see p. 142, n. 3. 'In other chariots the horses are yoked again after an interval of rest, but the horses of the Sun are allowed no repose,' S'. *Sūrya evambhūtaḥ san prayāti*, S'. *Gandha-vaha*, lit. 'the scent-bearer,' = *vāyu*, S'. *Śesha* = *Ananta*, a mythological serpent, the personification of eternity (*ananta-tā*) and king of the Nāgas or snakes who inhabit the lowermost of the seven Pātālas or infernal regions. His body formed the couch of Vishṇu, reposing on the waters of Chaos, whilst his thousand heads were the god's canopy. He is also said to uphold the world on one of his heads. He has become incarnate at various times, especially in the god Bala-rāma, the elder brother of Kṛishṇa. *Āhita*, see p. 149, n. 1. *Shashṭhānśa-vṛitter*, see p. 84, n. 1.

Verse 106. INDRA-VAJRĀ (a variety of TRISHṬUBH), containing eleven syllables to the Pāda or quarter-verse, each Pāda being alike.

– – ⏑ – – ⏑ ⏑ – ⏑ – – ||

यूथानि सञ्चार्य रविप्रतप्तः
शीतं दिवा स्थानमिव द्विपेन्द्रः[1] ॥१०७॥

॥ उपगम्य ॥ जयतु जयतु देवः । एते खलु हिमवतो गिरेरुपत्यकारण्यवासिनः काश्यपसन्देशमादाय सस्त्रीकास्तपस्विनः सम्प्राप्ताः । श्रुत्वा देवः प्रमाणम्[2] ।

राजा ॥ सादरम् ॥

किं काश्यपसन्देशहारिणः ।

कञ्चुकी ।

अथ किम्[3] ।

राजा ।

तेन हि मद्वचनाद्विज्ञाप्यतामुपाध्यायः सोमरातः । अमूनाश्रमवासिनः श्रौतेन विधिना[4] सत्कृत्य स्वयमेव प्रवेशयितुमर्हतीति । अहमप्यत्र तपस्विदर्शनोचिते प्रदेशे स्थितः प्रतिपालयामि ।

---

[1] 'Having supported his subjects as his own children, wearied in mind he seeks seclusion, as the chief of the elephants scorched by the sun, after conducting the herds to their pastures, in the (heat of the) day (seeks) a cool spot.' *Tantrayitvā*, from a nominal verb *tantraya* (see p. 187, n. 1), is the reading of all the Beng. MSS., supported by K.; two of the Deva-n., *śāntvayitvā*; the Mackenzie, *harshayitvā*. *Śrānta-manāḥ* is the reading of the Mackenzie, supported by K.; the other Deva-n., *śānta-manāḥ*, 'composed in mind.' *Sañcārya*, lit. 'having caused to move about or graze,'=*bhramayitvā*, S'. *Vivikta*=*vijana-pradeśa*. *Divā*=*madhyāhne*, 'in the middle of the day.' *Dvipendraḥ*=*hasti-rājaḥ*=*yūtha-nāthaḥ*, 'a large elephant, the leader of a wild herd.'

[2] 'Having heard, your Majesty must decide (what is to be done).' K. supplies *yat kartavyam*. *Pramāṇam*, see p. 31, n. 1 at the end.

[3] *Atha kim* is used *svīkāre*, S'. (see p. 46, n. 3).

[4] 'In the form enjoined by the scriptures' (=*śruti-bodhitena prakāreṇa*, S'.)

Verse 107. UPAJĀTI or ĀKHYĀNAKI (a variety of TRISHṬUBH). See verse 41.

कञ्चुकी ।

यदाज्ञापयति देवः । ॥ इति निष्क्रान्तः ॥

राजा ॥ उत्थाय ॥

वेत्रवति । अग्निशरणमार्ग[1]मादेशय ।

प्रतीहारी ।

[a]इदो इदो देवो ।

राजा ॥ परिक्रामति । अधिकारखेदं निरूप्य ॥

सर्वः प्रार्थितमर्थमधिगम्य सुखी सम्पद्यते जन्तुः । राज्ञां तु चरितार्थता दुःखोत्तरैव[2] ।

औत्सुक्यमात्रमवसादयति प्रतिष्ठा
क्लिश्नाति लब्धपरिपालनवृत्तिरेव ।
नातिश्रमापनयनाय न च श्रमाय
राज्यं स्वहस्तधृतदण्डमिवातपत्रम्[3] ॥१०८॥

[a] इत इतो देवः ।

---

[1] *Agni-śaraṇa*, see p. 148, n. 1. *Mārga*, see p. 161, l. 4, with note.

[2] 'The attainment of the object (of their ambition) is followed by pain.' *Ćaritārthatā=rājya-prāptiḥ*, 'the attainment of the throne,' Ś. *Duḥkhottarā=kheda-saṃvalitā*, 'encompassed with trouble,' Ś.

[3] 'The-attainment-of-the-object-of-ambition satisfies anxious longing merely; the very business of guarding what has been obtained, harasses. Royalty [the office of king], like a parasol, the handle of which is held in the hand, is not for the removal of great fatigue without leading to fatigue.' *Autsukyam=utkaṇṭhā*, 'longing,' 'eager desire;' such as *kadā rājā bhavishyāmītyādi*, 'when shall I become king, &c.?' *tam eva duḥkhadāyinī pratishṭhā avasādayati*, 'that (desire) certainly the harassing attainment-of-the-highest-rank allays,' Ć. Ś. reads *pratishṭhām*, and places it in opposition to *autsukya-mātram*, making *rājyam* nom. to *avasādayati*. The Beng. MS. [I. O. 1060] gives *pratishṭhām* in the margin, and this reading is certainly supported by a parallel passage (*sādayantī pratishṭhām*, &c.) in the beginning of Act III. of Vikram. Ć. also notices

Verse 108. VASANTA-TILAKĀ (a variety of ŚAKVARĪ). See verses 8, 27, 31, 43, 46, 64, 74, 80, 82, 83, 91, 93, 94, 95, 100, 104, 105.

॥ नेपथ्ये ॥

वैतालिकौ[1] ।

विजयतां देवः ।

प्रथमः ।

स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः
प्रतिदिनमथवा ते वृत्तिरेवंविधैव ।

---

this reading, but adopts the one in the text and censures the interpretation of S'. *Pratishṭhā* may have the sense I have given, which agrees with the *prārthitārthādhigamaḥ* and *ćaritārthatā* of the preceding lines. *Atiśrama* may either refer to the trouble which the king has undergone in arriving at the object of his ambition, or to the troubles of his subjects which it is his office to remove. In the latter case *na ća śramāya* will mean 'without leading to personal trouble or weariness.' The Indian *ćhattra*, or parasol, from the shelter it affords has been chosen as one of the insignia of royalty. It is very heavy, and being fixed on a long pole greatly fatigues the person holding it. It is always borne by a servant; but here the king is figuratively made to bear it himself, so that he cannot give shelter to himself and others, without undergoing great personal fatigue. *Na ća śramāya* is found in all the Deva-n. MSS.; the Beng. have *yathā śramāya*, i. e. 'royalty does not so much lead to the removal of fatigue as to fatigue.' According to K., who repeats the first negative before *na ća śramāya*, the two negatives are here employed affirmatively, i. e. to affirm that royalty does lead to personal fatigue. 'It is not for the removal of great fatigue and not not for fatigue.' Cf. a similar use of two negatives on p. 24, l. 10, with note.

[1] *Vaitālika*=*vandin*, 'a herald,' Ć.;=*stuti-pāṭhaka*, 'a panegyrist,' S'. He was a kind of herald or crier, whose duty was to announce, in measured verse, the fixed periods into which the king's day was divided. The strain which he poured forth usually contained allusions to incidental circumstances. In Vikram. and Ratn., only one Vaitālika appears, but here and in the Mālavik. there are two. In Vikram., Act II, he announces the sixth hour or watch of the day, about two or three o'clock, at which period alone the king is allowed to amuse himself. From the Daśa-kumāra it appears that a king's day and night were supposed to be divided into eight portions of one hour and a half, reckoned from sunrise, for distributing which strict directions are given, thus: Day—1. The king being dressed, is to audit accounts; 2. He is to pronounce judgment in appeals; 3. He is to breakfast; 4. He is to receive and make presents;

अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं
शमयति परितापं छायया संश्रितानाम्[1] ॥१०९॥

द्वितीयः ।

नियमयसि विमार्गप्रस्थितानात्तदण्डः
प्रशमयसि विवादं कल्पसे रक्षणाय ।
अतनुषु विभवेषु ज्ञातयः सन्तु नाम
त्वयि तु परिसमाप्तं बन्धुकृत्यं प्रजानाम्[2] ॥११०॥

---

5. He is to discuss political questions with his ministers; 6. He is to amuse himself; 7. He is to review his troops; 8. He is to hold a military council. Night—1. He is to receive the reports of his spies and envoys; 2. He is to sup or dine; 3. He is to retire to rest, after the perusal of some sacred work; 4 and 5. He is to sleep; 6. He is to rise and purify himself; 7. He is to hold a private consultation with his ministers, and instruct his officers; 8. He is to attend upon the *Purohita*, or family priest, for the performance of religious ceremonies. See Wilson's Hindū Theatre, vol. i. p. 209.

[1] 'Indifferent to thine own ease, thou endurest toil every day for the sake of (thy) people. But thy regular-business is of this very kind. For the tree suffers intense heat with its head (while) it allays by (its) shade the heat of those seeking (its) shelter.' *Athavā*, see p. 30, n. 3. *Vṛittir*, some of the Beng., supported by K. and S., have *sṛishṭir*.

[2] 'Having assumed the mace [sceptre] thou restrainest those who advance on the wrong road [set out on bad courses]; thou composest differences; thou art adequate to the protection (of thy people). Let kinsmen make their appearance forsooth in affluent circumstances [when there is abundant property], but in thee the whole duty of a kinsman is comprehended towards thy subjects.' *Ātta-daṇḍa*=*gṛihīta-daṇḍa*; *daṇḍa*, 'a magistrate's staff,' taken as a symbol of punishment and justice; it is sometimes 'the sceptre of a king;' hence *daṇḍa-dhara*, *daṇḍin*, 'staff-bearer,' &c., are names for Yama, the god of justice and lord of punishment. *Vimārga*, some have *kumārga*, 'bad ways.' *Kalpase* = *sampadyase*, K. Manu furnishes several examples of *kḷip* in the sense of 'to be sufficient,' 'to be fit' (see ii. 151, ii. 266, vi. 20; also Raghu-v. viii. 40).

Verses 109 and 110. MĀLINĪ or MĀNINĪ (a variety of ATI-ŚAKVARĪ). See verses 10, 19, 20, 38, 55.

राजा।

एते[1] क्लान्तमनसः पुनर्नवीकृताः स्मः। ॥ इति परिक्रामति ॥

प्रतीहारी।

[a] अहिणवसम्मज्जणससिरीओ सण्णिहिदहोमधेणू अग्गिसरणालिन्दो[2]। आरुहदु देवो।

राजा ॥ आरुह्य परिजनांसावलम्बी तिष्ठति ॥

वेत्रवति। किमुद्दिश्य भगवता काश्यपेन मत्सकाशमृषयः प्रेरिताः स्युः।

किं तावद्व्रतिनामुपोढतपसां विघ्नैस्तपो दूषितं
धर्मारण्यचरेषु केनचिदुत प्राणिष्वसच्चेष्टितम्।
आहो स्वित्प्रसवो ममापचरितैर्विष्टम्भितो वीरुधा-
मित्यारूढबहुप्रतर्कमपरिच्छेदाकुलं मे मनः[3] ॥१११॥

[a] अभिनवसम्मार्जनसश्रीकः सन्निहितहोमधेनुरग्निशरणालिन्दः। आरोहतु देवः।

Atanushu vibhaveshu=utsaveshu, 'at times of festivity.' *Kukshim-bharibhis taiḥ kim prayojanam*, 'what is the use of these parasitical gluttons as relations?' K. The Calcutta ed. and S'. have *saṃvibhaktāḥ* for *santu nāma*. The meaning may certainly be, 'let kinsmen make their appearance (i.e. start up they will on all sides) when there is plenty of property to divide.' K. refers to verse 155, towards the end of Act VI. of this play, *yena yena viyujyante prajāḥ*, &c., 'let it be publicly announced that of whatever dear kinsman his subjects are deprived, Dushyanta will be (in the place of) that (kinsman) to them, the wicked excepted.'

[1] The use of *ete* with 1st pers. pl. of the verb is noticeable, see p. 133, n. 2.

[2] 'The terrace of the fire-sanctuary, with the cow (that yields the ghee) for the oblations close by, is beautiful after its recent purification.' *Sa-śrīka*, lit. 'possessed of the goddess of beauty;' a bold metaphor, used elsewhere by Kālidāsa. *Homa-dhenu, agni-śaraṇa*, see p. 148, n. 1.

[3] 'Has the devotion [penance] of the ascetics, who have collected a store of penitential merit, been frustrated by impediments? or else has any harm been inflicted by any one on the animals grazing in the sacred

Verse 111. ŚĀRDŪLA-VIKRĪḌITA (a variety of ATIDHṚITI). See verses 14, 30, 36, 39, 50, 63, 79, 85, 86, 89, 97, 98.

प्रतीहारी ।

[a] सुअरिदणन्दिणो इसीओ देवं सभाजइदुं[1] आअदेत्ति तक्केमि ।

॥ ततः प्रविशन्ति गौतमीसहिताः शकुन्तलां पुरस्कृत्य मुनयः । पुरश्चैषां कञ्चुकी पुरोहितश्च ॥

कञ्चुकी ।

इत इतो भवन्तः ।

शार्ङ्गरवः ।

शारद्वत ।

महाभागः कामं नरपतिरभिन्नस्थितिरसौ
न कश्चिद्वर्णानामपथमपकृष्टोऽपि भजते ।
तथापीदं शश्वत्परिचितविविक्तेन मनसा
जनाकीर्णं मन्ये हुतवहपरीतं गृहमिव[2] ॥११२॥

[a] सुचरितनन्दिन ऋषयो देवं सभाजयितुमागता इति तर्कयामि ।

'grove? Or is it that the flowering of the creeping plants has been checked [stopped, stunted] through my misdeeds? Thus my mind, in which so many doubtful-conjectures have arisen, is perplexed with an inability to decide.' *Upoḍha=samprāpta*, K. *Vighnais*, see p. 40, n. 5. *Dharmāranya-ćareshu prāṇishu*, cf. p. 13, l. 3. *Āho svit*, used as particles of doubt, see Gram. 717. *h. Prasavaḥ*, i.e. *pushpa-phalādi*, 'the flower, fruit, &c.,' K. *Apa-ćaritaiḥ=dur-āćāraiḥ*.

[1] 'To pay homage to.' *Sabhāj* is one of the few dissyllabic roots.

[2] 'Granted that this king eminent-in-virtues [of high parts] swerves not from rectitude; (and that) not one of the classes, (not) even the lowest, addicts itself to evil courses; nevertheless with my mind perpetually familiarized to seclusion I regard this thronged (palace) as a house enveloped in flames.' *Kāmam* occurs frequently in this sense (cf. p. 24, l. 10; p. 55, n. 3). *Abhinna-sthitiḥ=avihata-maryādaḥ*, K.; *=sa-maryādaḥ*, S'. *Asau*, so read the Beng. and the Mackenzie MSS.; the others have *aho*. *Varṇānām*, i.e. *brāhmaṇādīnām*. *Apakṛishṭo 'pi*, 'even the lowest (class).' The castes were originally four in number: 1. Brāhmans or priests; 2. Kshatriyas or soldiers; 3. Vaiśyas or merchants and husbandmen; 4. Śūdras or slaves; see p. 84, n. 3. *A-patha*, 'a wrong road,' 'a bad

---

Verse 112. ŚIKHARIṆĪ (a variety of ATYASHṬI). See verses 9, 24, 44, 62.

शारद्वतः ।

स्थाने भवान्पुरप्रवेशादित्थम्भूतः संवृत्तः । अहमपि
अभ्यक्तमिव स्नातः शुचिरशुचिमिव प्रबुद्ध इव सुप्तम् ।
बद्धमिव स्वैरगतिर्जनमिह सुखसङ्गिनमवैमि[1] ॥ ११३ ॥

शकुन्तला ॥ निमित्तं सूचयित्वा[2] ॥

[a] अम्महे । किं मे वामेदरं[3] णअणं विप्फुरदि ।

गौतमी ।

[b] जादे । पडिहदं अमङ्गलं । सुहाइं दे भत्तुकुलदेवदाओ वितरन्दु । ॥ इति परिक्रामति ॥

पुरोहितः ॥ राजानं निर्दिश्य ॥

भो भोस्तपस्विनः । असावत्रभवान्वर्णाश्रमाणां रक्षिता[4] प्रागेव मुक्तासनो[5] वः प्रतिपालयति । पश्यतैनम् ।

[a] अहो । किं मे वामेतरं नयनं विस्फुरति । [b] जाते । प्रतिहतममङ्गलम् । शुभानि ते भर्तृकुलदेवता वितरन्तु ।

---

road;' a common metaphor, like *a-mārga*, *un-mārga*, *vi-mārga*, to express wicked courses. *Idaṃ janākīrṇam*, i. e. *idam puro-varti nṛipāṅgaṇam*, 'this royal court before my eyes,' S. ; *janākīrṇam* may perhaps be used, as in Vikram., Act II, l. 2, for a substantive, meaning 'a crowded thoroughfare.' *Hutavaha-parīta = lagnāgni*, S.

[1] 'I also regard (these) people here devoted to pleasure, as one-who-has-performed-his-ablutions (regards) one-smeared (with dirt), as the pure the impure, as the waking the sleeping, as he-whose-motion-is-free the bound.'

[2] See p. 20, n. 4. One MS. has *durnimittam*, 'a bad omen.'

[3] *Vāmetara*, 'other than left,' 'right.'

[4] 'The protector of the (four) classes and (four) orders;' see p. 193, n. 2, and p. 157, n. 1 at the end.

[5] Having but just quitted the seat (of justice);' see p. 190, n. 1.

Verse 113. ĀRYĀ or GĀTHĀ. See verse 2.

– – | ⏑ ⏑ – | – – || ⏑ ⏑ ⏑ ⏑ | ⏑ ⏑ – | ⏑ – ⏑ | ⏑ ⏑ – | –
– ⏑ ⏑ | – – | ⏑ ⏑ – || ⏑ ⏑ ⏑ ⏑ | ⏑ ⏑ – | ⏑ | ⏑ ⏑ – | ⏑

शार्ङ्गरवः ।

भो महाब्राह्मण । काममेतदभिनन्दनीयम् । तथापि वयमत्र मध्यस्थाः[1] । कुतः ।

भवन्ति नम्रास्तरवः फलागमै-
र्नवाम्बुभिर्भूरिविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम्[2] ॥११४॥

प्रतीहारी ।

[a] देव । पसण्णमुहवण्णा दीसन्ति । जाणामि । विस्सद्धकज्जा इसीओ[3] ।

[a] देव । प्रसन्नमुखवर्णा दृश्यन्ते । जानामि । विस्रब्धकार्या ऋषयः ।

---

[1] 'This is certainly a subject of rejoicing [to be rejoiced at]; nevertheless we here are indifferent parties [have nothing to do with it],' i. e. our merits and interests have nothing to do with his conduct. This favour and protection is only what might be expected from his benevolent nature. It is possible that by *vayam madhyasthāḥ* may be meant, 'we are indifferent persons,' 'we have no suit to urge nor petition to present.'

[2] 'Because trees become bent down by the growing-weight of fruit; clouds hang down the more (when charged) with fresh rain; good men are not made arrogant by abundant riches; this is the very nature of the benefactors of others.' *Kutaḥ*, see p. 55, n. 2. *Bhūri*, generally found in composition, but not always; see Mahā-bh xii. 1410. Most of the Beng. MSS. have *dūra*. This verse occurs in Bhartṛi-h. (ii. 62, ed. Bohlen), where *udgamaiḥ* is adopted for *āgamaiḥ*, and another reading *bhūmi* for *bhūri* is noticed. Oriental poets are fond of adducing trees and clouds as examples of disinterested liberality. 'The tree does not remove its shade from him who cuts it down,' Hitop. l. 353.

[3] 'The Ṛishis appear to have serene complexions. (Hence) I conclude they have some business that inspires confidence,' or 'some quiet and easy business.' *Prasanna-mukha-varṇāḥ*, so read two of the Deva-n. MSS supported by a similar compound in Mālavik. p. 55, l. 20. The Colebrooke MS. has *maṇḍana*, and my own *pankaā* for *vaṇṇā*.

Verse 114. VAṂŚA-STHAVILA (a variety of JAGATĪ). See verses 18, 22, 23, 67, 81.

राजा ॥ शकुन्तलां दृष्ट्वा ॥

अथात्रभवती ।

का स्विदवगुण्ठनवती नातिपरिस्फुटशरीरलावण्या ।
मध्ये तपोधनानां किसलयमिव पाण्डुपत्त्राणाम् ॥११५॥

प्रतीहारी ।

[a] देव । कुदूहलगब्भो पडिहिदो ण मे तक्को पसरदि[2] । णं दंसणीआ उण से आकिदी लक्खीअदि ।

राजा ।

भवतु । अनिर्वर्णनीयं[3] परकलत्रम् ।

शकुन्तला ॥ हस्तमुरसि कृत्वा । आत्मगतम् ॥

[b] हिअअ । किं एव्वं वेवसि । अज्जउत्तस्स भावं ओधारिअ धीरं दाव होहिं ।

पुरोहितः ॥ पुरो गत्वा ॥

एते विधिवदर्चितास्तपस्विनः । कश्चिदेषामुपाध्याय[5]सन्देशः ।

[a] देव । कुतूहलगर्भः प्रतिहितो न मे तर्कः प्रसरति । ननु दर्शनीया पुनरस्या आकृतिर्लक्ष्यते । [b] हृदय । किमेवं वेपसे । आर्यपुत्रस्य भावमवधार्य धीरं तावद्भव ।

---

[1] 'Who is this veiled-one, the loveliness of whose person is not fully displayed?' *Svid* is a particle of question and doubt. *Avagunṭhana =mastakāććhādana-vastra, C.* The second half of this verse is clear.

[2] 'My conjecture full of curiosity being hindered (by the veil) does not succeed.' The Mackenzie MS., supported by K., has *paḍihādi* for *pratibhāti* (in place of *pasaradi* for *prasarati*, the reading of the other Deva-n.) and *paḍihado* for *pahido*, the reading of the others.

[3] 'Ought not to be gazed at.' *A-nirvarṇanīya=a-darśanīya.*

[4] 'Having reflected on [called to mind] the affection of thy lord, be firm.' *Bhāva=sneha* (cf. p. 112, n. 2). The Beng. have *smṛitvā* for *avadhārya*. *Ārya-putra*, 'son of a venerable parent,' is the regular dramatic mode of addressing a husband.

[5] 'They have some message from the preceptor.'

Verse 115. ĀRYĀ or GĀTHĀ. See verse 2.

– ⏑ ⏑ | ⏑ – ⏑ | ⏑ ⏑ – || – ⏑ ⏑ | – ⏑ ⏑ | ⏑ – ⏑ | – – | –
– – | ⏑ – ⏑ | – – || ⏑ ⏑ ⏑ ⏑ | ⏑ ⏑ – | ⏑ | – – | –

तं देवः श्रोतुमर्हति ।

राजा ।

अवहितोऽस्मि ।

ऋषयः ॥ हस्तानुद्यम्य ॥

विजयस्व राजन् ।

राजा ।

सर्वानभिवादये ।

ऋषयः ।

इष्टेन युज्यस्व ।

राजा ।

अपि [1]निर्विघ्नतपसो मुनयः ।

ऋषयः ।

कुतो धर्मक्रियाविघ्नः सतां रक्षितरि त्वयि ।
तमस्तपति घर्मांशौ कथमाविर्भविष्यति[2] ॥११६॥

राजा ।

अर्थवान्खलु मे राजशब्दः[3] । अथ भगवाँल्लोकानुग्रहाय कुशली काश्यपः[4] ।

---

[1] *Nirvighna-tapasaḥ*, cf. p. 35, n. 3. *Api*, see p. 89, n. 2.

[2] 'Whence (can there be) obstruction to the religious rites of the good, thou being (their) defender? How should darkness appear, the Sun emitting light [when the Sun shines]?' *Tapati*, loc. of the pres. part., here used absolutely. *Gharmānśau=sūrye*, S.

[3] 'My title of Rāja has indeed significancy.' The Ṛishis had, in the preceding verse, compared the king to the Sun, and *rājan* is derived from *rāj*, 'to shine.' It is, however, probable that the play is on the words *rājan* and *rakshitṛi*. Cf. Manu vii. 3, *rakshārtham asya sarvasya rājānam asṛijat prabhuḥ*, 'the Supreme Being created a king for the protection of this universe.' Dr. Boehtlingk remarks that in these cases it little signifies whether the derivation be true or false. In Mahā-bh. xii. 1032, *rājan* is derived from *rañj*, 'to conciliate.'

[4] 'Is his reverence Kāśyapa prosperous for the welfare of the world?'

Verse 116. Śloka or Anushṭubh. See verses 5, 6, 11, 12, 26, 47, 50, 51, 56, 73, 76, 84, 87.

ऋषयः ।

स्वाधीनकुशलाः सिद्धिमन्तः । स भवन्तमनामयप्रश्नपूर्वकमिदमाह[1] ।

राजा ।

किमाज्ञापयति भगवान् ।

शार्ङ्गरवः ।

[a] वनवासस्य सौकुमारस्य च यत्सदृशं भविष्यति । [b] भोः । किं नु तत्रभवती रक्तकुवलयपल्लवशोभिनाग्रहस्तेन मुखमावार्य चकितचकितेव स्थिता । [c] आः । एष दास्याःपुत्रः कुसुमरसपाटच्चरस्तत्रभवत्या वदनमभिलङ्घति मधुकरः । [d] भवानेवाविनीतानां शासितास्य वारणे प्रभविष्यति ।

---

[1] 'A S'irīsha-blossom, with its stalk fastened in her ear, (and) its-filaments-hanging-down-to-her-cheek, has not been drawn [made], O friend. Nor has a necklace-of-lotus-fibres, soft-as-the-rays-of-the-autumnal-moon, been formed in the midst of her bosom.' *Bandhana*=*prasava-bandhana* =*vṛinta*, S'. and C'. (cf. p. 103, n. 1, and p. 229, n. 1). *S'irīsha,* see p. 7, n. 1, and p. 53, n. 1. The blossom of a plant is neuter in Sanskṛit.

[2] With regard to this passage and what follows, compare pp. 32, 33, 34. As to *rakta-kuvalaya,* &c., see p. 25, n. 1. As to *dāsyāḥ-putra,* see p. 61, n. 1.

Verse 150. VAṄS'A-STHAVILA (a variety of JAGATĪ). See verses 18, 22, 23, 67, 81, 114, 117, 119, 145.

राजा ।

युज्यते । अयि भोः कुसुमलताप्रियातिथे । किमत्र परिपतनखेदमनुभवसि ।

एषा कुसुमनिषण्णा तृषितापि सती भवन्तमनुरक्ता ।
प्रतिपालयति मधुकरी न खलु मधु विना त्वया पिबति[1] ॥१५१॥

सानुमती ।

[a] अज्ज अभिजादं क्खु एसो वारिदो[2] ।

विदूषकः ।

[b] पडिसिद्धावि वामा एसा जादी[3] ।

राजा ।

एवं भो न मे शासने तिष्ठसि । श्रूयतां तर्हि सम्प्रति ।

अक्लिष्टबालतरुपल्लवलोभनीयं
पीतं मया सदयमेव रतोत्सवेषु ।
बिम्बाधरं स्पृशसि चेद्भ्रमर प्रियाया-
स्त्वां कारयामि कमलोदरबन्धनस्थम्[4] ॥१५२॥

[a] अद्याभिजातं खल्वेष वारितः । [b] प्रतिषिद्धापि वामैषा जातिः ।

---

[1] 'Wherefore dost thou undergo the fatigue of hovering round about? There [*eshā*] resting-on-a-flower the-devotedly-attached female-bee, although being thirsty, waits for thee; nor indeed without thee will she sip (its) nectar.' *Paripatana*, 'flying round about,' the first sense of *pat* is 'to fly.'

[2] 'For-once-now this (bee) is warned-off [kept off] quite in a courteous manner.' The meaning is somewhat obscure, but there seems to be a satirical allusion to the king's polite address to the bee, followed as it is by a threat.

[3] 'This race (of animals), however (it may be) driven off, is perverse.' The Beng. MSS. and K. have *pratishiddha-vāmā*. *Vāma*, properly 'left,' 'not right;' hence 'turned from the right,' 'reverse,' 'perverse,' 'refractory.'

[4] 'If, O bee, thou touchest the Bimba-lip of (my) beloved, charming as

---

Verse 151. ĀRYĀ or GĀTHĀ. See verse 2.

– – | ∪ ∪ ∪ ∪ | – – || ∪ ∪ – | ∪ ∪ – | ∪ – ∪ | ∪ ∪ – | –
– ∪ ∪ | ∪ – ∪ | ∪ ∪ – || ∪ ∪ ∪ ∪ | ∪ ∪ – | ∪ | – ∪ ∪ | –

Verse 152. VASANTA-TILAKĀ (a variety of ŚAKVARĪ). See verses 8, 27, 31, &c., 148.

विदूषकः ।

[a] एवंतिण्हदण्डस्स किं ण भाइस्सदि[1] । ॥ प्रहस्य । आत्मगतम् ॥ [b] एसो दाव उम्मत्तो । अहम्पि एदस्स सङ्गेण ईदिसंवअणो विअ संवुत्तो । ॥ प्रकाशम् ॥ [c] भो । चित्तंक्खु एदं ।

राजा ।

कथं चित्रम् ।

सानुमती ।

[d] अहम्पि दाणिं अणवगदत्था । किं उण जहलिहिदाणुभावी एसो[2] ।

राजा ।

वयस्य । किमिदमनुष्ठितं पौरोभाग्यम्[3] ।

[a] एवंतीक्ष्णदण्डस्य किं न भेष्यति । [b] एष तावदुन्मत्तः । अहमप्येतस्य सङ्गेनेदृशवचन इव संवृत्तः । [c] भोः । चित्रं खल्वेतत् । [d] अहमपीदानीमनवगतार्था । किं पुनर्यथालिखितानुभाव्येषः ।

---

the uninjured blossom of a young tree, that very (lip which has been) tenderly drunk by me in love's banquets, (then) I will make thee imprisoned in the hollow of a lotus' (cf. verse 77, with note). *Bimbādhara*, 'lip like the Bimba,' i.e. of a bright red colour, like the gourd of the Bimba (Momordica Monadelpha), a cucurbitaceous plant. So *bimbādharālaktakaḥ*, Mālavik. p. 30, l. 1; Raghu-v. xiii. 16. Compare our expression, 'cherry-lip.' *Kamalodara-ba°*, see p. 183, n. 1. *Bandhana* seems here to mean 'the place of imprisonment.'

[1] 'How should he not stand in awe of one who has (threatened him with) so severe a punishment?' *Tīkshṇa-daṇḍa*, 'severe in punishing,' 'a strict disciplinarian.' The Prākṛit equivalent of *tīkshṇa* is *tiṇha*, according to Vararući iii. 33, although most of the MSS. have *tikkhaṇa*. Root *bhī* in Sanskṛit is usually joined with an abl., but the gen. is admissible (Gram. 855, 859); K., however, observes that this construction is peculiar to Prākṛit (cf. *dākshiṇya-paśćāttāpasya bibhemi*, Vikram., end of Act II).

[2] 'Even I now did not understand the thing; how much less should he perceive that it was painted?' *An-avagatārthā*, so reads the Mackenzie MS., supported by K.; the others, *avagatārthā*.

[3] 'Why has this ill-natured-act been perpetrated (by you)?' *Paurobhāgya*, see p. 212, n. 1. K. observes, *purobhāgī = doshaika-darśī = dushṭaḥ, tasya karma paurobhāgyam*, and refers to Pāṇ. v. 1, 124.

दर्शनसुखमनुभवतः साक्षादिव तन्मयेन हृदयेन ।
स्मृतिकारिणा त्वया मे पुनरपि चित्रीकृता कान्ता[1] ॥१५३॥

॥ इति बाष्पं विहरति[2] ॥

सानुमती ।

[a] पुव्वावरविरोही अपुव्वो एसो विरहमग्गो[3] ।

राजा ।

वयस्य । कथमेवमविश्रान्तदुःखमनुभवामि ।

प्रजागरात्खिलीभूतस्तस्याः स्वप्ने समागमः ।
बाष्पस्तु न ददात्येनां द्रष्टुं चित्रगतामपि[4] ॥१५४॥

[a] पूर्वापरविरोध्यपूर्व एष विरहमार्गः ।

---

[1] 'My beloved is once more transformed into a picture by thee reviving the recollection of me enjoying the bliss of beholding her just-as-if (she were) present before my eyes, having my (whole) soul wrapped-up-in-her.' *Tan-mayena=S'akuntalā-mayena*, S., lit. 'with a heart made of S'akuntalā,' i.e. wholly absorbed by her.

[2] *Viharati*, 'wipes away,' or 'sheds;' see p. 166, n. 5, and p. 154, n. 1.

[3] 'This demeanour of (one in a state of) separation, opposing first one thing and then another, is singular [unexampled, without a precedent].' *Pūrvāpara-virodhī* may mean 'setting itself against everything from first to last,' or 'from first to last untoward.' Lovers, when separated from each other, were supposed to find comfort and amusement in various trifling employments expressive of their passion (see Megha-d. 86); but here was the case of one whom nothing could divert.

[4] '(The hope of) meeting her in sleep is rendered vain through (my) wakefulness. Moreover the (blinding) tears (that fill my eyes) will not permit me to behold her even represented-in-a-picture.' *Vāshpa*, see p. 157, n. 1 in the middle. *Khilī-bhūta=dur-labha*, S'. In Hindū poetry dreams and pictures are the regular standing artifices of lovers for tricking themselves into fictitious unions with their mistresses; just as sleeplessness and tears are the regular standing impediments to such devices. Cf.

Verse 153. ĀRYĀ or GĀTHĀ. See verse 2.

– ⏑ ⏑ | ⏑ ⏑ ⏑ ⏑ | ⏑ ⏑ – || – – | ⏑ ⏑ – | ⏑ – ⏑ | ⏑ ⏑ – | ⏑
⏑ ⏑ – | ⏑ – ⏑ | – – || ⏑ ⏑ ⏑ ⏑ | – – | ⏑ | – – | –

Verse 154. ŚLOKA or ANUSHṬUBH. See verses 5, 6, 11, 12, 26, 47, 50, 51, 53, 73, 76, 84, 87, 125, 127, 146.

सानुमती।

[a] सव्वहा पमज्जिदं[1] तुए पच्चादेसदुक्खं सउन्दलाए।

चतुरिका ॥ प्रविश्य ॥

[b] जेदु जेदु भट्टा। वट्टिआकरण्डअं[2] गेण्हिअ इदोमुहं पत्थिदम्हि।

राजा।

किं च।

चतुरिका।

[c] सो मे हत्थादो अन्तरा[3] तरलिआदुदिआए देवीए वसुमदीए अहं एव्व अज्जउत्तस्स उवणइस्संत्ति सबलक्कारं गहिदो।

विदूषकः।

[d] दिट्ठिआ तुमं मुक्का।

चतुरिका।

[e] जाव देवीए विडवलग्गं उत्तरीअं तरलिआ मोचेदि। ताव मए णिव्वाहिदो[4] अत्ता।

[a] सर्वथा प्रमार्जितं त्वया प्रत्यादेशदुःखं शकुन्तलायाः। [b] जयतु जयतु भर्ता। वर्तिकाकरण्डकं गृहीत्वेतोमुखं प्रस्थितास्मि। [c] स मे हस्तादन्तरा तरलिकाद्वितीयया देव्या वसुमत्या अहमेवार्यपुत्रस्योपनेष्यामीति सबलात्कारं गृहीतः। [d] दिष्ट्या त्वं मुक्ता। [e] यावद्देव्या विटपलग्नमुत्तरीयं तरलिका मोचयति। तावन्मया निर्वाहित आत्मा।

Megha-d. 104, *Tvām ālikhya aśrais tāvan muhur upaćitair dṛishṭir ālupyate me krūras tasminn api na sahate san·gamaṃ nau kṛitāntaḥ.* See also Megha-d. 89, and Vikram., Act II, *Katham upālabhe nidrām svapne samāgama-kāriṇīm; na ća suvadanām ālekhye 'pi priyām samavāpya tām mama nayanayor udvāshpatvaṃ sakhe na bhavishyati.*

[1] *Pramārjita*, 'atoned for,' lit. 'wiped clean,' 'wiped out.'

[2] *Vartikā-karaṇḍaka*, 'box of colours,' see p. 249, n. 1.

[3] *Antarā*, 'on the way,' 'midway.' The same expression occurs in p. 257, l. 14. See also Mālavik. p. 8, l. 18. As to Vasumatī, see p. 184, n. 2.

[4] 'I took myself off,' 'I made my escape,' lit. 'by me my own person was carried off.' The Prākṛit is responsible for this idiom and construction. *Nirvāhita* is the reading of most of the Deva-n. MSS., and

राजा ।

वयस्य । उपस्थिता देवी बहुमानगर्विता[1] च । भवानिमां प्रतिकृतिं रक्षतु ।

विदूषकः ।

[a] अत्ताणंत्ति भणाहि । ॥ चित्रफलकमादायोत्थाय च ॥ [b] जइ भवं अन्तेउरकालकूडादो[2] मुच्चीअदि । तदो मं मेहप्पडिच्छन्दे पासादे सद्दावेहि[3] । ॥ इति द्रुतपदं निष्क्रान्तः ॥

सानुमती ।

[c] अण्णसङ्कन्तहिअओवि[4] पढमसम्भावणं अवेक्खदि । अदिसिढिलसोहदो दाणिं एसो ।

प्रतीहारी ॥ प्रविश्य पत्रहस्ता ॥

[d] जेदु जेदु देवो ।

राजा ।

वेत्रवति । न खल्वन्तरा दृष्टा त्वया देवी ।

[a] आत्मानमिति भण ।

[b] यदि भवानन्तःपुरकालकूटान्मुच्यते । ततो मां मेघप्रतिच्छन्दे प्रासादे शब्दय ।

[c] अन्यसङ्क्रान्तहृदयोऽपि प्रथमसम्भावनामपेक्षते । अतिशिथिलसौहृद इदानीमेषः ।

[d] जयतु जयतु देवः ।

---

there seems no reason why it should not stand with the sense 'carried away,' 'borne off.' K. has *nirvāsita*, 'expelled.' Some of the Bengālī, *ṇihṇavida* for *nihnuta*, 'concealed.' S'. has *nirgata*.

[1] 'Rendered insolent by my great attention to her.'

[2] 'From the bane of the inner apartments.' *Kāla-kūṭa*, at the churning of the ocean, after the deluge, by the gods and demons, for the recovery or production of fourteen sacred things, a deadly poison called Kāla-kūṭa or Halāhala was generated, so virulent that it would have destroyed the world, had not the god S'iva swallowed it. Its only effect was to leave a black mark on his throat, whence his name Nīla-kaṇṭha. K. has *kalahādo* (=*kalahāt*), 'from the strife,' and S'. *kūṭāt*, 'from the snare.'

[3] 'Call me in the palace (named) Megha-praticchanda.' *S'abda* may form either a nominal or a verb of the 10th class; cf. p. 152, n. 1.

[4] 'Although his heart [affection] is transferred to another.' Cf. in Vikram., Act III, *Anya-saṅkrānta-premāṇo nāgarā adhikaṃ dakshiṇā bhavanti.*

प्रतीहारी ।

[a] अहइं । पत्तहत्थं मं देक्खिअ पडिणिउत्ता ।

राजा ।

कार्यज्ञा कार्योपरोधं मे परिहरति ।

प्रतीहारी ।

[b] देव । अमच्चो विण्णवेदि । अत्थजादस्स गणणाबहुलदाए एक्कं एव्व पोरकज्जं अवेक्खिदं[1] । तं देवो पत्तारूढं पच्चक्खीकरेदुत्ति ।

राजा ।

इतः पत्रिकां दर्शय । ॥ प्रतीहार्युपनयति ॥

राजा ॥ अनुवाच्य ॥

कथम् । समुद्रव्यवहारी सार्थवाहो धनमित्रो नाम नौव्यसने विपन्नः । अनपत्यश्च किल तपस्वी । राजगामी तस्यार्थसञ्चय इत्येतदमात्येन लिखितम् । कष्टं खल्वनपत्यता । बहुधनत्वाद्बहुपत्नीकेन तत्रभवता भवितव्यम् । विचार्यताम् । यदि काचिदापन्नसत्त्वा तस्य भार्यासु स्यात् ।

प्रतीहारी ।

[c] देव । दाणिं एव्व साकेदअस्स सेट्ठिणो दुहिआ णिव्वुत्तपुंसवणा जाआ से सुणीअदि[2] ।

[a] अथ किं । पत्रहस्तां मां दृष्ट्वा प्रतिनिवृत्ता । [b] देव । अमात्यो विज्ञापयति । अर्थजातस्य गणनाबहुलतयैकमेव पौरकार्यमपेक्षितम् । तद्देवः पत्रारूढं प्रत्यक्षीकरोत्विति । [c] देव । इदानीमेव साकेतकस्य श्रेष्ठिनो दुहिता निर्वृत्तपुंसवना जायास्य श्रूयते ।

---

[1] 'By reason of the length of the calculation of the various-items-of-revenue, only one case among the citizens has been brought under consideration.' *Artha-jātasya*, &c., some of the Beng. have *rāja-kāryasya bahulatayā*. *Bahulatayā*, cf. *pallavatayā*, p. 29, n. 1.

[2] 'It is reported that his wife, the daughter of the foreman of a guild belonging to Ayodhyā, has even now just completed the ceremony (performed) at the quickening (of the unborn child).' *Sāketakasya*, Sāketa is a name of Ayodhyā, 'the invincible city,' the ancient capital of Rāma-

राजा ।

ननु गर्भः[1] पित्र्यं रिक्थमर्हति । गच्छ । एवममात्यं ब्रूहि ।

प्रतीहारी ।

[a] जं देवो आणवेदि । ॥ इति प्रस्थिता ॥

राजा ।

एहि तावत् ।

प्रतीहारी ।

[b] इअम्हि ।

राजा ।

किमनेन सन्ततिरस्ति नास्तीति ।

येन येन वियुज्यन्ते प्रजाः स्निग्धेन बन्धुना ।
स स पापादृते तासां दुष्यन्त इति घुष्यताम्[2] ॥१५५॥

प्रतीहारी ।

[c] एव्वं णाम घोसइदव्वं । ॥ निष्क्रम्य । पुनः प्रविश्य ॥ [d] काले पवुट्ठं[3] विअ अहिणन्दिदं देवस्स सासणं ।

राजा ॥ दीर्घमुष्णं च निःश्वस्य ॥

एवं भोः सन्ततिच्छेदनिरवलम्बानां कुलानां मूलपुरुषा-

[a] यद्देव आज्ञापयति । [b] इयमस्मि । [c] एवं नाम घोषयितव्यम् ।
[d] काले प्रवृष्टमिवाभिनन्दितं देवस्य शासनम् ।

ćandra and founded by Ikshvāku, the first of the monarchs of the Solar dynasty (see p. 15, n. 1). It was situated on the river Sarayu in the North of India, and is now called Oude. *S'reshṭhin*, 'the head of a guild or corporation practising the same trade.' *Puṃ-savana*, 'the rite performed on the quickening of the fœtus,' is the second of the twelve purificatory ceremonies enjoined by Manu on the three superior classes (ii. 27, &c.) It comes next in order to the *garbhādhāna* or 'ceremony on conception;' cf. p. 199, l. 1, with note; see Indian Wisdom, p. 246.

[1] *Garbhaḥ*=*garbha-sthaḥ putraḥ*, 'the child in the womb,' K.

[2] See the translation of this verse, p. 191, n. 2 at the end.

[3] 'Like grateful-rain at the right season.' *Pravṛishṭam*=*prahṛishṭa-varshaṇam*. Some of the Beng. have *paviṭṭham* (=*pravishṭam*).

Verse 155. Śloka or Anushṭubh. See verses 5, 6, &c., 154.

वसाने सम्पदः परमुपतिष्ठन्ति[1] । ममाप्यन्ते पुरुवंशश्रीरकाल इवोप्तबीजा भूरेवंवृत्ता ।

प्रतीहारी ।

[a] पडिहदं अमङ्गलं[2] ।

राजा ।

धिङ्मामुपस्थितश्रेयोऽवमानिनम् ।

सानुमती ।

[b] असंसअं सहिं एव्व हिअए करिअ णिन्दिदो णेण अप्पा ।

राजा ।

संरोपितेऽप्यात्मनि धर्मपत्नी
त्यक्ता मया नाम कुलप्रतिष्ठा ।
कल्पिष्यमाणा महते फलाय
वसुन्धरा काल इवोप्तबीजा[3] ॥१५६॥

सानुमती ।

[c] अपरिच्छिण्णा दाणिं दे सन्ददी भविस्सदि ।

a प्रतिहतममङ्गलम् । b असंशयं सखीमेव हृदये कृत्वा निन्दितोऽनेनात्मा ।
c अपरिच्छिन्नेदानीं ते सन्ततिर्भविष्यति ।

---

[1] 'The goods of families who are bereft of support through the failure of lineal descendants, pass over to a stranger at the decease of the representative-of-the-original-stock.' *Mūla-purusha*, 'the man who represents the original progenitor, from whom, in a direct line, the family is descended,' 'the eldest surviving son,' lit. 'the stock-man.'

[2] 'The misfortune be averted!' compare p. 194, l. 8.

[3] 'Although myself was implanted (in her womb), verily (my) lawful wife, the glory of (my) family, was repudiated by me, like the earth sown with seed at the right-season, about to become adequate to the production of mighty fruit.' *Saṃropite ātmani=svasmin upte sati*, K., lit. 'myself being sown,' 'she being sown with myself,' i. e. 'she bearing my second self in her womb.' According to the Hindū notion, a child is a reproduction of one's self. *Ātmaiva patnyā jāyate*, K. *Kula-pratishṭhā*, see p. 124, n. 1. *Kalpishyamāṇā*, see p. 191, n. 2 in the middle. *Vasundharā*, cf. p. 184, n. 2.

Verse 156. Upajāti or Ākhyānakī (a variety of Trishṭubh). See verses 41, &c., 142.

चतुरिका ॥ जनान्तिकम् ॥

[a] अए । इमिणा सत्थवाहवुत्तन्तेण विउणुव्वेओ भट्टा । णं अस्सासिदुं मेहप्पडिच्छन्दादो अज्जं माठव्वं गेण्हिअ आअच्छेहि ।

प्रतीहारी ।

[b] सुट्ठु भणासि । ॥ इति निष्क्रान्ता ॥

राजा ।

अहो दुष्यन्तस्य संशयमारूढाः पिण्डभाजः । कुतः ।

अस्मात्परं वत यथाश्रुति सम्भृतानि
  को नः कुले निवपनानि नियच्छतीति ।
नूनं प्रसूतिविकलेन मया प्रसिक्तं
  धौताश्रुशेषमुदकं पितरः पिवन्ति[1] ॥१५७॥

॥ इति मोहमुपागतः ॥

[a] अये । अनेन सार्थवाहवृत्तान्तेन विगुणोद्वेगो भर्ता । एनमाश्वासयितुं मेघप्रतिच्छन्दादार्यं माठव्यं गृहीत्वागच्छ । [b] सुष्ठु भणसि ।

---

[1] 'Woe is me! the ancestors of Dushyanta are brought to a critical situation; because—Thinking to themselves, Who, alas! after this (man), in our family, will offer (us) the oblations prepared according to scriptural-precept? in all probability,' &c.; see p. 111, n. 1. *Piṇḍa-bhājaḥ=pitaraḥ*, S'., lit. 'partakers of oblations to the dead,' i.e. the Manes of deceased ancestors for whom the S'rāddha was performed. *Kutaḥ*, see p. 55, n. 2. *Asmāt*, i.e. *Dushyantāt*, S'. *Dhautāśru-śesha*, compare the analogous compounds *tvag-asthi-śesha*, 'having nothing left but skin and bone;' *nāma-śesha*, 'having nothing surviving but a name.' The Beng. MSS. read *dhautāśru-sekam*. The duty of performing the S'rāddha devolved on the eldest son or on the nearest surviving relative. If no one survived to celebrate this rite, the Manes of deceased progenitors sank from their celestial abode to the lower regions. Cf. Raghu-v. i. 66, 67; see Indian Wisdom, p. 253 sqq.

Verse 157. VASANTA-TILAKĀ (a variety of ŚAKVARI). See verses 8, 27, 31, 43, 46, 64, 74, 80, 82, 83, 91, 93, 94, 95, 100, 104, 105, 108, 123, 124, 144, 148, 152.

चतुरिका ॥ ससम्भ्रममवलोक्य ॥

[a] समस्ससदु समस्ससदु भट्टा ।

सानुमती ।

[b] हद्धी हद्धी । सदिक्खु दीवे ववधाणदोसेण एसो अन्धआरदोसं अणुहोदि[1] । अहं दाणिं एव्व णिव्वुदं करेमि । अहवा सुदं मए सउन्दलं समस्सासअन्तीए महेन्दजणणीए मुहादो । जण्णभाओसुआ[2] देवा एव्व तह अणुचिट्ठिस्सन्ति जह अइरेण धम्मपदिणिं भट्टा अहिणन्दिस्सदित्ति । ता जुत्तं एदं कालं पडिपालिदुं[3] । जाव इमिणा वुत्तन्तेण

[a] समाश्वसितु समाश्वसितु भर्ता । [b] हा धिक् हा धिक् । सति खलु दीपे व्यवधानदोषेणैषोऽन्धकारदोषमनुभवति । अहमिदानीमेव निर्वृतं करोमि । अथवा श्रुतं मया शकुन्तलां समाश्वासयन्त्या महेन्द्रजनन्या मुखात् । यज्ञभागोत्सुका देवा एव तथानुष्ठास्यन्ति यथाचिरेण धर्मपत्नीं भर्ताभिनन्दिष्यतीति । तस्माद्युक्तमेतं कालं प्रतिपालयितुम् । यावदनेन वृत्तान्तेन

---

[1] 'A light being really (near at hand) this-man by reason [fault] of the screen (which covers it) experiences (all the) ill-effects of darkness.' Dr. Boehtlingk proposes to interpret *andhaāra-dosaṃ* by *andhakāra-doshām*, 'dark night,' or 'the darkness of night,' but this seems hardly a legitimate compound, nor does the sense require it.

[2] 'Longing for their portions of the sacrifice.' *Jaṇṇa* is the Prākrit equivalent for *yajña* (Vararući iii. 44). Great sacrifices were performed by kings in celebration of auspicious events, especially after marriage, in the hope of securing issue, and Indra as well as the inferior gods were invited to partake of portions set apart for them. These sacrifices were accompanied by largesses to the Brāhmans, and festivities, in which the gods were supposed to be eager to participate. Cf. Rāmāy. i. 13; 6. 8. The mother of Indra was Aditi, who was the wife of Kaśyapa (see p. 22, n. 3). It appears from Act VII. of this play that S'akuntalā was at this time enjoying an asylum with the illustrious pair Kaśyapa and Aditi in some sacred retreat, where they were engaged in acts of mortification and penance.

[3] 'Therefore it is proper to wait for this period.' This is the reading of K. Some of the Deva-n. have *tā ṇa juttaṃ kālam*, &c. (=*tasmān na yuktaṃ kālam*, &c.)

[a] पिअसहिं समस्सासेमि । ॥ इत्युद्भ्रान्तकेन[1] निष्क्रान्ता ॥

नेपथ्ये ।

[b] अब्बम्हण्णं अब्बम्हण्णं[2] ।

राजा ॥ प्रत्यागतप्राणः[3] । कर्णं दत्त्वा ॥

अये । माठव्यस्येवार्तस्वरः । कः कोऽत्र भोः ।

प्रतीहारी ॥ प्रविश्य ॥

[c] परित्ताअदु देवो संसअगदं[4] वअस्सं ।

राजा ।

केनात्तगन्धो[5] माणवकः ।

प्रतीहारी ।

[d] अदिट्ठरूवेण केणवि सत्तेण अदिक्कमिअ मेहप्पडिच्छन्दस्स पासादस्स अग्गभूमिं आरोविदो[6] ।

[a] प्रियसखीं समाश्वासयामि । [b] अब्रह्मण्यम् अब्रह्मण्यम् । [c] परित्रायतां देवः संशयगतं वयस्यम् । [d] अदृष्टरूपेण केनापि सत्त्वेनातिक्रम्य मेघप्रतिच्छन्दस्य प्रासादस्याग्रभूमिमारोपितः ।

---

[1] See p. 218, n. 1, i. e. *udbhramaṇena ākāśam pratyudgamena*, K.

[2] *Abrahmaṇyaṁ* ('Help! to the rescue!'), according to Amara-k. i. 7, 14, is *abadhyoktau*, i. e. implies an assertion that the thing in question is not to be killed. *Abadhyo 'ham ity arthaḥ*, S., 'the meaning is that, as a Brāhman, my person is sacred and inviolable.' Cf. in the Uttara-Rāma-ćaritra, p. 30, 'Then by a Brāhman, having placed his dead son at the royal gate, a cry of "Abrahmaṇya" was set up, accompanied by a smiting on the breast.' *A-brahmaṇya*, lit. '(anything) unworthy of a Brāhman.'

[3] So reads my own MS. One Deva-n. has *pratyāgataḥ*, the others simply *karṇaṁ dattvā*. The Beng. *pratyāgata-ćetanaḥ*.

[4] 'Fallen into danger,' 'placed in jeopardy.' As to *gata*, see p. 38, n. 1.

[5] *Ātta-gandha*=*ātta-garva*, 'humbled,' 'having the pride taken down,' 'insulted.' Compare in the Mahā-bh. *rājyam ātta-lakshmi*, 'a kingdom stripped of its wealth.' According to some, *ātta-gandha*=*ārta-kaṇṭha*, 'throttled,' 'strangled.'

[6] 'By some demon of invisible form, having seized [overpowered] him, he has been mounted on a pinnacle of the palace (called) Megha-prati-ććhanda.' *Sattva*=*bhūta*, 'a goblin,' 'evil spirit.'

राजा ॥ उत्थाय ॥

मा तावत्। ममापि सत्त्वैरभिभूयन्ते गृहाः[1]। अथवा।

अहन्यहन्यात्मन एव ताव-
ज्ज्ञातुं प्रमादस्खलितं न शक्यम्।
प्रजासु कः केन पथा प्रयाती-
त्यशेषतो वेदितुमस्ति शक्तिः[2] ॥१५८॥

नेपथ्ये।

[a]भो वअस्स। अविहा अविहा[3]।

राजा ॥ गतिभेदेन[4] परिक्रामन् ॥

सखे। न भेतव्यं न भेतव्यम्।

a भो वयस्य। अविधा अविधा।

---

[1] *Gṛiha,* 'a house,' or 'a wife,' is masc. in the plural (Amara-k. ii. 5). The Sāhit.-d. (p. 190) inserts *nāma,* 'forsooth,' after *mamāpi.*

[2] 'Even one's own false-steps (proceeding from) heedlessness (occurring) day by day cannot be altogether ascertained. Is there (then) the power to know in every case by what road each of my subjects is walking?' lit. 'by what road who among my subjects,' &c. *Tāvat=sākalyena,* K. *Pramāda-skhalitam,* 'tripping from carelessness,' 'stumbling,' 'blundering.' *A-śeshataḥ=sākalyena,* K. According to K., this last clause presents an example of *kāku,* which is defined as 'a change in the tone of the voice,' 'giving emphasis.' Thus, 'Is there the power?' becomes equivalent to 'there certainly is not the power' (see Sāhit.-d. p. 24). *Kāku* is constantly used by Paṇḍits of a sentence spoken interrogatively, and so with a change of voice.

[3] *Avidhā ity ākrośe.* The interjection *avidhā* is used in calling for assistance, K. Translate, 'Help! help!' Two of the MSS. have *aviha* for *avidha;* the Mackenzie, *aviddho;* my own, *avidū. Aviha* and *avihā* seem to be interchangeable. *Avihā* occurs in Mālavik. p. 12, l. 22; p. 24, l. 7; p. 56, l. 8. Dr. Boehtlingk suggests that *avida* in Mṛićchak. p. 213, l. 6; p. 312, l. 9, may be for *aviha* or *avihā.*

[4] *Gati-bhedena,* 'with hurried broken steps;' *tvarita-gamanena ity arthaḥ,* K.

Verse 158. UPAJĀTI or ĀKHYĀNAKĪ (a variety of TRISHṬUBH). See verse 41, 107, 121, 126, 142, 156.

नेपथ्ये ॥ पुनस्तदेव पठित्वा ॥

[a] कहं ण भाइस्सं । एस मं कोवि पच्चावणदसिरोहरं[1] इक्खुं विअ तिण्हभङ्गं करेदि ।

राजा ॥ सदृष्टिक्षेपम् ॥

धनुस्तावत् ।

यवनी ॥ प्रविश्य शार्ङ्गहस्ता[2] ॥

[b] भट्टा । एदं हत्थावावसहिदं[3] सरासणं ।

॥ राजा सशरं धनुरादत्ते ॥

नेपथ्ये ।

एष त्वामभिनवकण्ठशोणितार्थी
शार्दूलः पशुमिव हन्मि चेष्टमानम् ।
आर्तानां भयमपनेतुमात्तधन्वा
दुष्यन्तस्तव शरणं भवत्विदानीम्[4] ॥१५९॥

राजा ॥ सरोषम् ॥

कथं मामेवोद्दिशति । तिष्ठ कुणपाशन । त्वमिदानीं न भविष्यसि । ॥ शार्ङ्गमारोप्य ॥ वेत्रवति । सोपानमार्गमादेशय ।

a कथं न भेष्यामि । एष मां कोऽपि पश्चादवनतशिरोधरमिक्षुमिव तीक्ष्णभङ्गं करोति ।

b भर्तः । हस्तावापसहितं शरासनम् ।

---

[1] *Paśćād-avanata-śirodharam*, a Bahuvrīhi compound agreeing with *mām*. Some MSS. have *praty-avanata*.

[2] As to *Yavanī* and *śārṅga-hastā*, see p. 62, n. 2.

[3] *Hastāvāpa*=*jyāghāta-vāraṇa*, K.;=*anguli-trāṇa*, 'a guard to protect the hand or fore-arm from the bow-string,' 'an arm-guard,' 'a finger-guard;' from *hasta*, 'a hand,' or 'the lower arm,' and *āvāpa*, 'a band' or 'bracelet;' cf. p. 114, n. 2. The Beng. have *hastāvāra*.

[4] 'Here, thirsting for (thy) fresh throat-blood, will I slay thee struggling, as a tiger (slays) a beast. Let Dushyanta now, who grasps his bow to remove the fear of the oppressed, be thy refuge [protector].' *Ārtānām*, &c., cf. p. 14, l. 4. *Ātta-dhanvā*, cf. p. 230, l. 1.

Verse 159. PRAHARSHIṆĪ (a variety of ATIJAGATĪ), containing thirteen syllables to the Pāda or quarter-verse, each Pāda being alike.

– – – | ⏑ ⏑ ⏑ ⏑ – ⏑ – ⏑ – – ||

प्रतीहारी ।

[a] इदो इदो देवो ।

॥ सर्वे सत्वरमुपसर्पन्ति ॥

राजा ॥ समन्तादवलोक्य ॥

शून्यं खल्विदम् ।

नेपथ्ये ।

[b] अविहा[1] अविहा । अहं अत्तभवन्तं पेक्खामि । तुमं मं ण पेक्खसि । विडालग्गहिदो मूसओ विअ णिरासोम्हि जीविदे संवुत्तो ।

राजा ।

भोस्तिरस्करिणीगर्वित[2] । मदीयमस्त्रं त्वां द्रक्ष्यति । एष तमिषुं सन्धत्ते ।

यो हनिष्यति वध्यं त्वां रक्ष्यं रक्षति च द्विजम् ।
हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यपः[3] ॥१६०॥

॥ इत्यस्त्रं सन्धत्ते ॥

[a] इत इतो देवः । [b] अविधा अविधा । अहमत्रभवन्तं प्रेक्षे । त्वं मां न प्रेक्षसे । विडालगृहीतो मूषक इव निराशोऽस्मि जीविते संवृत्तः ।

---

[1] *Avidhā*, see p. 264, n. 3. My own MS. has *avihā* in this place.

[2] 'Priding thyself on the power of rendering thyself invisible.' *Tiraskariṇī* is properly a veil to cover the head, used by celestial beings to render themselves invisible (cf. p. 227, l. 5). It is here the science or art, peculiar to such beings, of so concealing themselves. This interpretation is supported by the gloss of Raṅganātha on *tiraskariṇī-praććhannā* in Act II. of Vikram.; *tiraskariṇī* = *antardhāna-vidyā*. It answers to the *śikhā-bandhanī vidyā*, 'art of tying [covering] the top-knot,' called *a-parājitā* in a preceding page.

[3] 'He it is fits the arrow (to the bow) who will slay thee worthy-of-death, and save a Brāhman worthy-of-preservation. For the flamingo extracts [takes] the milk (and) leaves behind the water that is mixed with it.' The Hindūs imagine that the Haṇsa or flamingo (see p. 251, n. 1) has the power of separating milk from water. Compare Mahā-bh.,

Verse 160. Śloka or Anushṭubh. See verses 5, 6, 11, 12, 26, 47, 50, 51, 53, 73, 76, 84, 87, 125, 127, 130, 146, 154, 155.

॥ ततः प्रविशति विदूषकमुत्सृज्य मातलिः ॥

मातलिः[1] ।

कृताः शरव्यं हरिणा तवासुराः
शरासनं तेषु विकृष्यतामिदम् ।
प्रसादसौम्यानि सतां सुहृज्जने
पतन्ति चक्षूंषि न दारुणाः शराः[2] ॥१६१॥

राजा ॥ अस्त्रमुपसंहरन् ॥

अये मातलिः । स्वागतं महेन्द्रसारथे ।

विदूषकः ॥ प्रविश्य ॥

[a] अहं जेण इट्ठिपसुमारं मारिदो । सो इमिणा साअदेण अहिणन्दीअदि[3] ।

[a] अहं येनेष्टिपशुमारं मारितः । सोऽनेन स्वागतेनाभिनन्द्यते ।

S'akuntalopākhyāna, vii. 88, *Prājnas tu jalpatām punsām śrutvā vāćaḥ śubhāśubhāḥ, guṇavad vākyam ādatte, hansaḥ kshīram ivāmbhasaḥ* (i. 3078). Bhartṛi-h. (ii. 15) has the following sentiment: 'Brahmā [whose vehicle is the flamingo] when very angry with this bird, can destroy his nest among the lotuses, but cannot deprive him of that celebrated and inestimable faculty which he possesses, of separating milk from water.' The reference is probably to the milky juice of the water-lily, which would be its natural food, and to which allusion is often made by the Hindū poets. As to *rakshati*, see p. 85, n. 2.

[1] *Mātali* is the charioteer of Indra. In the pictures which represent this god mounted on his other vehicle, an elephant (called Airāvata), Mātali is seen seated before him on the withers of the animal, acting as its driver. In the drama, however (see p. 12, n. 1), Indra is generally borne in a chariot drawn by two horses (called Harī or Harayaḥ), which were guided by Mātali.

[2] 'The demons are made by Indra thy mark; let this bow (of thine) be drawn against them. Not on a friendly-person are dreadful arrows directed [fall] by the good, [but rather] eyes soft-with-(looks of)-favour.' *Asurāḥ*, &c., see p. 86, n. 2; p. 87, n. 1.

[3] 'He by whom I was being slaughtered like a sacrificial victim, is

---

Verse 161. VANSA-STHAVILA (a variety of JAGATĪ). See verses 18, 22, 23, 67, 81, 114, 117, 119, 145, 150.

मातलिः ॥ सस्मितम् ॥

आयुष्मन् । श्रूयताम् । यदर्थमस्मि[1] हरिणा भवत्सकाशं प्रेषितः ।

राजा ।

अवहितोऽस्मि ।

मातलिः ।

अस्ति कालनेमि[2]प्रसूतिर्दुर्जयो नाम दानवगणः ।

राजा ।

अस्ति श्रुतपूर्वं मया नारदात्[3] ।

मातलिः ।

सख्युस्ते स किल शतक्रतोरजय्य-
स्तस्य त्वं रणशिरसि स्मृतो निहन्ता ।
उच्छेत्तुं प्रभवति यन्न सप्तसप्ति-
स्तन्नैशं तिमिरमपाकरोति चन्द्रः[4] ॥१६२॥

---

greeted with a welcome by this man!' *Ishṭi-paśu-māram māritaḥ=ishṭi-paśur iva māritaḥ*, K. This kind of adverbial compound is noticed in Pāṇ. iii. 4, 45. 46. So *aja-nāśam nashṭaḥ* is equivalent to *aja iva nashṭaḥ*, and *ghṛita-nidhāyam nihitaḥ* to *ghṛita iva nihitaḥ*.

[1] The Mackenzie MS. has *yadartham*, supported by some of the Bengālī.

[2] *Kālanemi*, son of the demon Hiraṇya-kaśipu, was a Daitya or Asura (see p. 86, n. 2) with a hundred arms and as many heads. These Daityas were sometimes called Dānavas, from their mother Danu, who as well as Diti was one of the wives of Kaśyapa and daughters of Daksha. The Rākshasas, or cannibal demons who, for the sake of human flesh, waged perpetual war with men, as the Daityas did with the gods, were related to the Daityas.

[3] *Nārada* is a celebrated divine sage or Ṛishi, usually reckoned among the ten Prajāpatis or Brahmādikas first created by Brahmā, and called his sons. He acts as a kind of messenger of the gods (see the end of Act V. of the Vikramorvaśī).

[4] 'Verily that (troop of demons) is not to be subdued by thy friend Indra; thou, at the head of the fight, art appointed [termed, called] its destroyer. That nocturnal darkness which the sun has no power to

Verse 162. PRAHARSHIṆĪ (a variety of ATIJAGATĪ). See verse 159.

स भवानात्त[1]शस्त्र एवमिदानीं तमैन्द्ररथमारुह्य विजयाय प्रतिष्ठताम् ।

राजा ।

अनुगृहीतोऽहमनया मघवतः सम्भावनया । अथ माठव्यं प्रति भवता किमेवं प्रयुक्तम् ।

मातलिः ।

तदपि कथ्यते । किञ्चिन्निमित्तादपि मनःसन्तापादायुष्मान्मया विक्लवो दृष्टः । पश्चात्कोपयितुमायुष्मन्तं तथा कृतवानस्मि । कुतः ।

ज्वलति चलितेन्धनोऽग्निर्विप्रकृतः पन्नगः फणं कुरुते ।
प्रायः स्वं महिमानं क्षोभात्प्रतिपद्यते हि [2]जनः ॥१६३॥

राजा ॥ जनान्तिकम् ॥

वयस्य । अनतिक्रमणीया [3]दिवस्पतेराज्ञा । तदत्र परिगतार्थं

---

remove, the moon dispels.' *Sata-kratu*, 'lord of a hundred sacrifices;' another of Indra's thousand names. He is so called because the rank which he occupies is unattainable excepting through a hundred Aśva-medhas, or 'horse-sacrifices' (see p. 86, n. 2). *Sapta-saptiḥ*, 'drawn by seven steeds;' see p. 12, n. 1. *Ćandraḥ*, the appositeness of this comparison depends on the fact that Dushyanta's pedigree was traceable to the moon (see p. 15, n. 2; p. 113, n. 1).

[1] *Ātta-śastra*, cf. *ātta-daṇḍaḥ*, p. 191, l. 4, and *ātta-dhanvā*, p. 265, l. 12.

[2] 'Fire blazes up when the fuel is stirred; the snake when irritated expands its hood; verily a man generally regains his own high-spiritedness [greatness, courage] through being roused-to-action [shaken, excited].' *Phaṇaṃ kurute*, lit. 'makes a hood;' *phaṇa*, 'the expanded hood of the cobra.' *Kshobhāt*, K. has *kopāt*. My own MS. and the Mackenzie have *jantuḥ* for *hi janaḥ*. Most of the Bengālī MSS. read *tejasvī saṅkshobhāt prāyaḥ pratipadyate tejaḥ*.

[3] Indra, as the Hindū Jove, is lord of the atmosphere and winds (see p. 86, n. 2).

Verse 163. ĀRYĀ or GĀTHĀ. See verse 2.

| ∪ – ∪ | – ∪ ∪ | –
∪ ∪ ∪ ∪ | ∪ – ∪ | – – || – ∪ ∪ | – – | ∪ ∪ – | ∪ | – ∪ ∪ | –
– – | – ∪ ∪ | – – || – –

कृत्वा[1] मद्वचनादमात्यपिशुनं ब्रूहि ।

त्वन्मतिः केवला तावत्परिपालयितुं प्रजाः ।
अधिज्यमिदमन्यस्मिन्कर्मणि व्यापृतं[2] धनुः ॥१६४॥

इति ।

विदूषकः ।

[a] जं भवं आणवेदि । ॥ इति निष्क्रान्तः ॥

मातलिः ।

आयुष्मान्रथमारोहतु ।

॥ राजा रथारोहणं नाटयति ॥

॥ इति निष्क्रान्ताः सर्वे ॥

॥ षष्ठोऽङ्कः ॥

[a] यद्भवानाज्ञापयति ।

---

[1] 'Having made acquainted with the circumstance;' Piśuna, 'informer,' is the name of the minister (cf. p. 236, l. 10).

[2] 'Let the-powers-of-thy mind be wholly and solely (exerted) to protect-by-good-government (my) subjects. This (my) braced [strung] bow is (for a time) occupied in a different employment.' *Tāvat*, cf. p. 264, l. 3. The root *pāl*, 'to protect,' in reference to a king or his officers, implies protection by a just administration of the laws. *Samyak pāl* occurs frequently in the sense of 'to govern justly.' *Adhi-jyam*, see p. 9, n. 2; and cf. p. 67, l. 12; p. 87, l. 8.

Verse 164. ŚLOKA OR ANUSHṬUBH. See verses 5, 6, 11, 12, 26, 47, 50, 51, 53, 73, 76, 84, 87, 125, 127, 146, 154, 155, 160.

॥ अथ सप्तमोऽङ्कः ॥

॥ ततः प्रविशत्याकाशयानेन रथाधिरूढो राजा मातलिश्च ॥

राजा ।

मातले । अनुष्ठितनिदेशोऽपि मघवतः सत्क्रियाविशेषादनुपयुक्तमिवात्मानं समर्थये[1] ।

मातलिः ॥ सस्मितम् ॥

आयुष्मन्[2] । उभयमप्यपरितोषं समर्थये ।

प्रथमोपकृतं मरुत्वतः प्रतिपत्त्या लघु मन्यते भवान् ।
गणयत्यवदानतोषितो भवतः सोऽपि न सत्क्रियागुणान्[3] ॥१६५॥

राजा ।

मातले । मा मैवम् । स खलु मनोरथानामप्यभूमिर्विसर्जनावसरसत्कारः[4] । मम हि दिवौकसां समक्षमर्धासनोपवेशितस्य

---

[1] 'Although I have executed (his) commission, after-such-a-distinguished reception (on the part) of Indra, I consider myself as unworthy (of so much honour).' *Satkriyā-viśeshāt*, cf. p. 41, l. 9; p. 134, l. 18. The ablative may imply 'in consequence of,' 'after.' *An-upayuktam*, i.e. *tādṛik-satkriyāyā ayogyam*, Chézy. *Samarthaye=avagaćhāmi.*

[2] *Āyushman*, cf. p. 9, n. 1.

[3] 'Your Highness makes light of the prior benefit (conferred by you) on Indra, (compared) with the (subsequent) mark-of-distinction (conferred by him on you). He too (Indra) takes no account of the distinguished honours (bestowed) on your Highness, being-filled-with-admiration at your heroic-achievement.' *Prathamopakṛitam*, i.e. *rākshasa-jaya-rūpam pūrvopakāram*, K. *Pratipattyā=sambhāvanayā. Avadāna=paurusha*, 'a deed of heroism,' K. The Colebrooke MS. has *toshito* for *vismito*. *Satkriyā-guṇān=sambhāvanā-viśeshān*, K. *Guṇa* is used at the end of a compound with the sense of *viśesha* (cf. *sambhāvanā-guṇa*, verse 168). The Beng. reading is, *Upakṛitya hares tathā bhavān laghu satkāram avekshya manyate, gaṇayaty avadāna-sammitām bhavataḥ so 'pi na satkriyām imām.*

[4] 'That honorary-distinction on the occasion of (his) dismissing (me)

Verse 165. VAITĀLĪYA. See verses 52, 133.

अन्तर्गतप्रार्थनमन्तिकस्थं
जयन्तमुद्वीक्ष्य कृतस्मितेन ।
आमृष्टवक्षोहरिचन्दनाङ्का
मन्दारमाला हरिणा पिनद्धा[1] ॥१६६॥

मातलिः ।

किमिव नामायुष्मानमरेश्वरान्नार्हति । पश्य ।

सुरसखस्य हरेरुभयैः कृतं
त्रिदिवमुद्धृतदानवकण्टकम् ।
तव शरैरधुना नतपर्वभिः
पुरुषकेशरिणश्च पुरा नखैः[2] ॥१६७॥

---

was certainly beyond the compass [reach, place] of my hopes,' i. e. exceeded all my expectation. *A-bhūmi=a-sthāna*, 'want of place;'=*a-vishaya*, 'beyond the reach,' K. Cf. p. 285, l. 7, and Mālavik. p. 35, l. 4, *abhūmir iyam mālavikāyāḥ*.

[1] 'For a garland of Mandāra (flowers), marked with yellow-sandal from (its) rubbing on (his) breast, was fastened (round the neck) of me, made to sit on half his throne, before the eyes of the gods, by Indra, smiling and looking up at (his son) Jayanta, (who was) standing by and inwardly longing (for the same honours).' *Āmṛishṭa*, the breast of Indra was dyed yellow with a fragrant sandal-wood called Hari-ćandana (cf. Kumāra-s. v. 69), and the garland, from coming in contact with it, became tinged with the same colour. Wreaths and garlands of flowers were much used by the Hindūs as marks of honorary distinction, as well as for ornaments on festive occasions, and to adorn sacrificial victims (cf. p. 222, l. 11, n. 1). They were suspended round the neck (see p. 150, n. 3), or placed on the head. Mandāra is one of the five ever-blooming trees of Svarga, or Indra's heaven. Another of these trees is said to be the Hari-ćandana mentioned above, and another the Santāna; but the two most celebrated are the Pārijāta and the Kalpa-druma, or tree granting all desires. Jayanta is the son of Indra by his favourite wife Paulomī or S'aći.

[2] 'The heaven of Indra, friend of the gods, has been made free from the plague of the Dānavas by two (means); now by thy flat-jointed arrows,

---

Verse 166. UPAJĀTI or ĀKHYĀNAKĪ (a variety of TRISHṬUBH). See verses 41, &c., 158.
Verse 167. DRUTA-VILAMBITA (a variety of JAGATĪ). See verses 45, 72, 128, 140.

राजा ।

अत्र खलु शतक्रतोरेव महिमा स्तुत्यः ।
सिध्यन्ति कर्मसु महत्स्वपि यन्नियोज्याः
सम्भावनागुणमवेहि तमीश्वराणाम् ।
किं वाभविष्यदरुणस्तमसां विभेत्ता
तं चेत्सहस्रकिरणो धुरि नाकरिष्यत् ॥१६८॥

---

and formerly by the claws of the man-lion.' *Sura-sakha*, see p. 86, n. 2. *Tri-diva=svarga*, each of the superior Hindū gods has a heaven or paradise of his own. That of Brahmā is called Brahma-loka, situated on the summit of Mount Meru; that of Vishṇu, Vaikuṇṭha, on the Himālayas; that of S'iva and Kuvera, Kailāsa, also on the Himālayas; that of Indra, Svarga or Nandana. The latter, though properly on one of the points of Mount Meru, below Brahmā's paradise, is sometimes identified with the sphere of the sky or heaven in general. *Uddhṛita-dā°*, lit. 'having the thorns of Dānavas extracted.' *Kaṇṭaka*, 'a thorn,' is often used for a noxious person or thing. *Dānava*, see p. 268, n. 2. *Nata-parvabhiḥ=nimna-parvabhiḥ* (*natāni anunnatāni parvāṇi yesham*, K.) Cf. *nata-nāsika*, 'flat-nosed;' also Rāmāy. i. 1, 64, *śareṇānata-parvaṇā* [*bibheda sapta-tālān*], which should be resolved into *śareṇa ānata-parvaṇā*, not *anata*, &c. *Purusha-keśarin=nara-sinha*, 'the man-lion,' i. e. Vishṇu; for in this monstrous shape of a creature half-man, half-lion, which was his fourth Avatāra or incarnation, Vishṇu delivered the three worlds, or earth, Pātāla, and heaven, from the tyranny of an insolent demon called Hiraṇya-kaśipu, who had usurped the sovereignty of Indra (see Vishṇu-p. p. 126; Indian Wisdom, p. 331).

[1] 'Verily, when servants [delegates] succeed in mighty enterprises, understand thou that (there has been) peculiar condescension [distinguished capacity] on-the-part-of (their) masters. How indeed could Aruṇa be the disperser of the-shades-of-night, if the thousand-rayed-one did not place him in front (of his car)?' *Niyojyāḥ=sevakāḥ*, S'. *Sambhāvanā-guṇam=satkāra-viśesham*, K. (see p. 271, n. 1). *Sambhāvanā* may mean 'fitness,' 'capability,' as well as 'honour.' The condescension consisted in placing Dushyanta in front of the battle, just as the Sun places the Dawn in front of his chariot. *Sahasra-kiraṇa* is one of the innumerable names for the Sun. As to Aruṇa, 'the Dawn,' see p. 142, n. 3. *Dhuri=rathāgre*, S'.; *=agre, puro-bhāge*, K.

Verse 168. VASANTA-TILAKĀ (a variety of ŚAKVARĪ). See verses 8, 27, 31, &c., 157.

मातलिः ।

सदृशमेवैतत् । ॥ स्तोकमन्तरमतीत्य ॥ आयुष्मन् । इतः । पश्य नाकपृष्ठगतस्य सौभाग्यमात्मयशसः ।

विच्छित्तिशेषैः सुरसुन्दरीणां
वर्णैरमी कल्पलतांशुकेषु ।
सञ्चिन्त्य गीतिक्षममर्थबन्धं
दिवौकसस्त्वच्चरितं लिखन्ति[1] ॥१६९॥

राजा ।

मातले । असुरसम्प्रहारोत्सुकेन पूर्वेद्युर्दिवमधिरोहता न

---

[1] 'Behold the sublimity [beauty, auspiciousness] of (thy) own fame that has reached to the vault of heaven. With the tints remaining from the colours (used in the toilet) of the heavenly fair-ones, these inhabitants of the sky are painting [tracing] thy exploits on vestments [tapestry, leaves] of the Kalpa-tree, thinking of verses suitable for singing.' *Viććhitti*= *ranga*, *rāga*, S. and C. *Viććhitti-śeshaiḥ*=*viśishṭair varṇaiḥ*, K., i.e. *kusuma-kasturikā-ćandanādibhiḥ*, 'with flowers, musk, sandal, and other cosmetics.' The first sense of the word is 'excision,' 'cutting off;' it rarely has the sense required here, of 'rouge,' 'paint.' Compare *bhakti-ććheda*, 'the coloured streak (marking Vaishṇava) devotion,' Megha-d. verse 20. *Sura-sundarīṇām* = *divya-strīṇām*. *Kalpa-latānśukeshu* = *kalpa-latā-vastreshu*, S. and C. The first sense of *anśuka* is 'cloth,' 'tapestry;' it is said to bear the meaning 'leaf,' and may be so used here; in which case the idea may be that the gods are writing Dushyanta's memoirs on the leaves of the Kalpa tree. K.'s comment is not quite clear, *kalpa-latāsu anśukābharaṇādi* [*na*] *vidyante iti prasiddha*; but it seems likely, especially if reference is made to p. 155, n. 3 of this play, that he intends to imply that the Kalpa tree, which was a tree yielding everything (see p. 272, n. 1), produced the vestments or tapestry on which they might be supposed to design the adventures of Dushyanta. *Gīti-kshamam*=*gāna-yogyam* is the reading of K. and the Bengālī; most of the Deva-n. MSS. have *gīta-kshamam* (cf. p. 29, n. 1 at the end). *Artha-bandham*=*padam*, 'a verse,' 'word;' *artho badhyate anena iti artha-bandhaḥ padam*, K.; cf. *tulyānurāga-piśunam lulitārtha-bandham pattre niveśitam udāharaṇam priyāyāḥ*, &c., Vikram., Act II.

Verse 169, UPAJĀTI OR ĀKHYĀNAKĪ, See verses 41, 107, 121, 126, 142, 156, 158, 166.

लक्षितः स्वर्गमार्गः । कतरस्मिन्मरुतां पथि वर्तामहे[1] ।

मातलिः ।

त्रिस्रोतसं वहति यो गगनप्रतिष्ठां
ज्योतींषि वर्तयति च प्रविभक्तरश्मिः ।
तस्य द्वितीयहरिविक्रमनिस्तमस्कं
वायोरिमं परिवहस्य वदन्ति मार्गम्[2] ॥१७०॥

---

[1] 'In which course [path, orbit] of the (seven) winds are we now moving?' The Hindūs divide the heavens into seven Mārgas or Pathas, i.e. paths, courses, orbits (like the stories of the Mussalmān creed), assigning a particular *vāyu* or wind to each. Cf. Vishṇu-p. p. 212. The first of these seven, *vāyu-mārgāḥ* or *vāyu-pathas*, is identical with the *bhuvar-loka*, or atmospheric region, extending from the *bhūr-loka*, or terrestrial region [comprising the earth, and the *adho-loka*, called Pātāla], upwards to the sun. The wind assigned to this Mārga is called *āvaha*, and its office is to bear along the atmosphere, clouds, meteors, lightning, &c. The other six make up the *svar-loka* or heavenly region with which Svarga is often identified (cf. p. 272, n. 2) in the following order:—The 2nd Mārga is that of the sun, and its wind, called *pravaha* or *pravāha*, causes the sun to revolve; 3rd, that of the moon, its wind *saṃvaha* or *saṃvāha* impels the moon; 4th, that of the *nakshatra*, or lunar constellations, its wind *udvaha* causes the revolution of these asterisms; 5th, that of the *graha*, or planets, its wind *vivāha* bears along the seven planets; 6th, that of the *saptarshi*, or seven stars of the Great Bear, its wind *parivaha* bears along these luminaries, as well as the *svar-gaṅgā*, or heavenly Ganges [*saptarshi-ćakraṃ svar-gaṅgāṃ shashṭhaḥ parivahas tathā*]; it appears from the next verse that this was the Mārga in which Indra's car was at the moment moving; 7th, that of *dhruva*, or the polar-star, the pivot or axis of the whole planetary system, to which, according to the Vishṇu-p. (pp. 230, 240), 'all the celestial luminaries are bound by aerial cords, and are made to travel in their proper orbits, being kept in their places by their respective bands of air.' According to the Brahmāṇḍa-p., from which, as quoted by K., the above account is taken, the wind of the seventh Mārga, causing the revolution of the polar-star, is *parāvāha* [? *parāvaha*]. All the Deva-n. MSS. read *katarasmin* for *katamasmin*; sometimes *katara* is used for *katama*.

[2] 'They call this road, freed-from-all-impurities-by-the-second-stride-of-

---

Verse 170. VASANTA-TILAKĀ (a variety of ŚAKVARĪ). See verses 8, 27, 31, &c., 168.

राजा ।

मातले । अतः खलु सबाह्यान्तःकरणो ममान्तरात्मा

Vishṇu, (the road) of that wind Parivaha, which bears along the triple-flowing-river [Ganges] located in heaven, and causes the stars [of the Great Bear] to revolve, duly-distributing-their-rays.' See the last note. *Tri-srotas=svar-gan̄gā=mandākinī*, K. The Ganges was supposed to take its rise in the toe of Vishṇu [whence one of its names, *Vishṇu-padī*]; thence it flowed through the heavenly sphere, being borne along by the wind Parivaha and identified with the Mandākinī, or Milky way: its second course is through the earth; but the weight of its descent was borne by S'iva's head, whence after wandering among the tresses of his hair, it descended through a chasm in the Himālayas: its third course is through Pātāla, or the lower regions, the residence of the Daityas and Nāgas, and not to be confounded with Naraka, 'hell,' 'the place of punishment.' *Gagana-pratishṭhām=ākāśa-sthām*, S'. and C'.; were it not for this interpretation I should translate 'the glory of the skies;' cf. p. 260, l. 11. There is doubtless a double-entendre. *Jyotīn̄shi*, &c., i. e. *saptarshīṇām dhishṇyāni*, K. *Pravibhakta-raśmiḥ*, i. e. *asan̄kīrṇa-raśmayas tejān̄si yasmin karmaṇi tat tathoktam*, K. *Vartayati=sañćārayati*, K. *Dvitīya-hari°*, i. e. *dvitīyena harer vishṇor vikrameṇa pāda-nyāsena nirdosham*, K. *Tasya vāyor*, &c., i. e. *tasya parivāhākhyasya vāyor mārgam panthānam imam gṛihṇanti āmananti. Parivāho* [sic] *nāma svar-gan̄gām saptarshi-maṇḍalam pravartayati shashṭho vāyu-skandho yathoktam Brahmāṇḍa-purāṇe*, K. The story of Vishṇu's second stride was this—An Asura or Daitya (see p. 86, n. 2) named Bali or Mahābali, a descendant of Hiraṇya-kaśipu had, by his devotions, gained the dominion of Heaven, Earth, and Pātāla. Vishṇu undertook to trick him out of his power, and assuming the form of a Vāmana, or dwarf (his fifth Avatāra), he appeared before the giant, and begged, as a boon, as much land as he could pace in three steps. This was granted, and the god immediately expanded himself till he filled the world, deprived Bali at the first step, of earth; at the second, of heaven; but, in consideration of some merit, left Pātāla still under his rule. Another account makes him comprehend earth in his first step, the region of the air in his second, and heaven in his third. Hence *tri-vikrama, tri-pāda*, as names of Vishṇu. See Indian Wisdom, p. 331, n. 1. The Beng. MSS. have, in place of *tasya dvitīya* &c., *tasya vyapeta-rajasaḥ pravahasya vāyor mārgo dvitīya-hari-vikrama-pūta eshaḥ.*

[1] 'Hence, indeed, do-I-feel-a-delightful-repose in all my senses [organs] external and internal,' lit. 'hence my inner soul along with my external

प्रसीदति । ॥ रथाङ्गमवलोक्य ॥ मेघपदवीमवतीर्णौ स्वः[1] ।

मातलिः ।

कथमवगम्यते ।

राजा ।

अयमरविवरेभ्यश्चातकैर्निष्पतद्भि-
र्हरिभिरचिरभासां तेजसा चानुलिप्तैः ।
गतमुपरि घनानां वारिगर्भोदराणां
पिशुनयति रथस्ते शीकरक्लिन्ननेमिः[2] ॥१७१॥

---

organs feels (a pleasurable) repose.' Cf. in Vikram. end of Act IV, *tvad-darśanena prasanno me savāhyāntarātmā*, i. e. 'body and soul,' 'my external and internal being,' 'my outer and inner man.' And again, *Urvaśī-gātra-sparśād iva nirvṛitam me sa-hṛidayaṃ śarīram.* The organs of sense (*indriya*) according to the Sān·khya system are divided into two classes, external, *vāhyendriya;* and internal, *antar-indriya.* The external are of two kinds: the five 'organs of perception,' *jñānendriya*, viz. the ear, eye, skin, tongue, and nose; and the five 'organs of action,' *karmendriya*, viz. the throat, hand, foot, organ of excretion, and that of generation. The internal organs are three, viz. *manas*, 'the mind,' or organ of thought; *buddhi*, 'the reason,' or organ of apprehension; *ahan·kāra*, 'individuality,' or 'self-consciousness.' *Ćitta*, 'the heart,' or organ of feeling, is sometimes added. The Amara-k. (i. 4, 17) divides the Indriyas into two grand classes: 1. *karmendriyāṇi;* and 2. *buddhīndriyāṇi* or *dhīndriyāṇi*, 'intellectual organs;' the latter comprises the *jñānendriyāṇi* with *manas;* this seems to be the popular division. Cf. Vikram., Act III, *bhavitavya-tānuvidhayīni buddhīndriyāṇi.*

[1] 'We have descended to the path of the clouds,' i. e. to the atmospheric region between the sun and the earth, the Mārga of the clouds and of the Āvaha wind (see p. 275, n. 1). The chariot must, therefore, have traversed with the speed of lightning, the four intervening Mārgas of the planets, lunar constellations, moon, and sun. If the Beng. reading, *pravahasya*, be adopted in the last verse, the transition would merely be from one Mārga to the next.

[2] 'Here [*ayam*] by the Ćātakas flying forth through the interstices of the spokes, and by the horses glistening with the flash of the lightnings, thy chariot, the rings [circumferences] of whose wheels are bedewed with

Verse 171. Mālinī or Māninī. See verses 10, 19, 20, 38, 55, 109, 110, 120.

मातलिः ।

क्षणादायुष्मान्स्वाधिकारभूमौ वर्तिष्यते ।

राजा ॥ अधोऽवलोक्य ॥

वेगावतरणादाश्चर्यदर्शनः संलक्ष्यते मनुष्यलोकः । तथा हि

शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनी
पर्णाभ्यन्तरलीनतां विजहति स्कन्धोदयात्पादपाः ।
सन्तानात्तनुभावनष्टसलिला व्यक्तिं भजन्त्यापगाः
केनाप्युत्क्षिपतेव पश्य भुवनं मत्पार्श्वमानीयते[1] ॥१७२॥

---

mist, betrays (our) progress over clouds whose bellies are pregnant with rain.' *Ara=nemy-avashṭambha;* the Beng. MSS. and the Mackenzie read *aga*, 'a mountain.' *Ara-vivarebhyaś ćakrāvayavānām vivarebhyo antarāla-pradeśebhyaḥ*, K. *Nishpatadbhiḥ=nirgaććhadbhiḥ*, K. (see p. 253, n. 1 at the end). The Ćātaka is a kind of cuckoo. The Hindūs suppose that it drinks only the water of the clouds, and their poets usually introduce allusions to this bird in connexion with cloudy or rainy weather (see Megha-d. verses 9, 23, 113; Raghu-v. xvii. 60). So *trishākulaiś ćātaka-pakshiṇām kulaiḥ prayāćitā valāhakāḥ*, Ritu-s. ii. 3. *Haribhir=aśvaiḥ*, especially Indra's horses (see p. 12, n. 1, and cf. Raghu-v. iii. 43). *Aćira-bhāsām = vidyutām*, S. *Gatam*, &c., *teshām meghānām upari ūrdhva-bhāge gatam gamanam*, K. *Piśunayati=sūćayati*, K.

[1] 'The earth descends as it were from the summit of the upward-rising [emergent] mountains. The trees, from the elevation [coming-into-view, rising, appearing] of (their) trunks, lose their state of being enveloped [concealed, wrapped] in their foliage. The rivers whose-waters-were-lost-in-narrowness, become visible [acquire manifestation] from the expansion (of their waters). Behold! the earth is being brought up to my side [near me], as if by some one flinging it upwards.' In the same way to a voyager in a balloon at a very great height, the surface of the earth would seem flat, the trees would be compressed within their foliage like mushrooms, and the rivers shrivel into threads or tiny rivulets; but, on descending, the mountains would appear to stand out, and the earth to recede from them, the trees would exhibit their elevation, and the rivers their breadth of water. *Unmajjatām=udgaććhatām*, K. *Avarohati=adhogaććhati*, K. *Parṇābhyantara°*. The Colebrooke MS. and my own have

Verse 172, ŚĀRDŪLA-VIKRĪḌITA. See verses 14, 30, 36, 39, 40, 63, 79, 85, &c., 149.

मातलिः ।

साधु दृष्टम् । ॥ सबहुमानं विलोक्य ॥ अहो उदाररमणीया पृथिवी ।

राजा ।

मातले । कतमोऽयं पूर्वापरसमुद्रावगाढः कनकरसनिस्यन्दी सान्ध्य इव मेघपरिघः सानुमानालोक्यते ।

मातलिः ।

आयुष्मन् । एष खलु हेमकूटो[2] नाम किम्पुरुषपर्वतस्तपसां सिद्धिक्षेत्रम् । पश्य ।

स्वायम्भुवान्मरीचेर्यः प्रबभूव प्रजापतिः ।
सुरासुरगुरुः सोऽत्र सपत्नीकस्तपस्यति[3] ॥१७३॥

---

parṇa-svāntara; the Taylor, *parṇeshvantara;* the Mackenzie, *parṇa-prastara;* K., *parṇāntara-vilīnam. Skandhodayāt=kroḍāvirbhāvāt*, K. *Santānat=jala-vistārāt*, K.; the other Deva-n. have *santānais. Tanubhāva°, tanubhāvena sūkshmatvena adrishṭaṃ salilaṃ yāsām*, K. *Vyaktim bhajanti*, i. e. *vyaktā bhavanti*, K.

[1] 'What mountain yonder is seen, bathing itself in the eastern and western ocean, pouring down a golden stream like a bar [bank, gate] of evening clouds?' *Parigha* occurs in p. 87, l. 6, meaning 'the bar of a gate,' but it may also denote the gate itself. *Sānu-mat*, lit. 'possessed of table-land,' 'a mountain having extensive level ground on its summit.'

[2] *Hema-kūṭa*, 'golden-peaked,' a sacred range of mountains lying among the Himālaya chain, and apparently identical with, or immediately adjacent to Kailāsa, the paradise of Kuvera, the god of wealth, as it is here described as the mountain of the Kimpurushas, or servants of Kuvera. They are a dwarfish kind of monster, with the body of a man and the head of a horse, and are otherwise called Kinnara (*aśva-mukha, turanga-mukha*). This mountain is also here described as 'the scene [place, field] of the perfect fulfilment of penance.' The Mackenzie MS. has *tapasvinām* for *tapasām*.

[3] 'That Prajāpati [Kaśyapa], who sprang from Marīći, the Self-existent's-son [i. e. from Marīći, son of Brahmā], (and who is) the father of the gods and demons, practices penance here along with his wife (Aditi).' An account of Kaśyapa, who, as son of Marīći, is called Mārīća, is given

Verse 173. Śloka or Anushṭubh. See verses 5, 6, 11, 12, 26, 47, 50, 51, &c., 164.

राजा ।

तेन ह्यनतिक्रमणीयानि[1] श्रेयांसि। प्रदक्षिणीकृत्य[2] भगवन्तं गन्तुमिच्छामि ।

मातलिः ।

प्रथमः कल्पः[3] ।

॥ नाट्येनावतीर्णौ ॥

राजा ॥ सविस्मयम् ॥

उपोढशब्दा न रथाङ्गनेमयः
प्रवर्तमानं न च दृश्यते रजः ।
अभूतलस्पर्शतया निरुद्धत-
स्तवावतीर्णोऽपि रथो न लक्ष्यते[4] ॥१७४॥

---

in p. 22, n. 3, and p. 86, n. 2. He is here said to be one of the Prajāpatis, or fathers of all created things, who were Brahmā's sons, created by him to supply the universe with inhabitants, and who, after fulfiling their mission, retired from the world to practise penance and prepare for death. The Vāyu-purāṇa certainly reckons Kaśyapa, with his father-in-law Daksha and other sages, among the Prajāpatis, but he does not belong to the seven original Prajāpatis of whom his father Marīći is one, nor to the ten enumerated by Manu (i. 35). Of the thirteen daughters of Daksha married to Kaśyapa, the eldest, and his favourite wife, was the Aditi introduced here, from whom were born the gods and particularly the twelve Ādityas, the several representatives of the sun in the twelve months of the year. From Diti, Danu, and others of the remaining twelve, came the Asuras or demons; and, from Vinatā, Aruṇa, 'the Dawn' (see p. 142, n. 3), and Garuḍa, 'the vehicle of Vishṇu and king of birds.' *Svāyambhuvāt = Brahma-sunoḥ*, K. *Surāsura-guruḥ*, as to *guru*, see p. 173, n. 3, and p. 91, l. 3. *Sa-patnīkas*, i. e. *patnyā Adityā saha* (cf. *sa-strīka, sa-śrīka*, &c.)

[1] *Anatikramaṇīya*, cf. p. 68, l. 7; p. 91, l. 3. *Śreyāṅsi = śubhāni, kaśyapa-darśana-namaskārādīni*, 'lucky occasions,' 'opportunities for obtaining blessings, such as visiting and paying homage to Kaśyapa.'

[2] *Pradakshiṇī-kṛitya*, see p. 159, l. 8.

[3] 'A noble resolve,' 'a prime idea,' = *mukhyaḥ pakshaḥ*, K.; cf. p. 205, l. 7.

[4] 'The circumferences of the chariot-wheels cause no sound, and no

---

Verse 174. VAṄŚA-STHAVILA (a variety of JAGATĪ). See verses 18, 22, 23, &c., 161.

मातलिः ।

एतावानेव शतक्रतोरायुष्मतश्च विशेषः ।

राजा ।

मातले । कतमस्मिन्प्रदेशे मारीचाश्रमः ।

मातलिः ॥ हस्तेन दर्शयन् ॥

वल्मीकार्धनिमग्नमूर्तिरुरसा सन्दष्टसर्पत्वचा
कण्ठे जीर्णलताप्रतानवलयेनात्यर्थसम्पीडितः ।
अंसव्यापि शकुन्तनीडनिचितं बिभ्रज्जटामण्डलं
यत्र स्थाणुरिवाचलो मुनिरसावभ्यर्कबिम्बं स्थितः॥१७५॥

---

dust is seen rising-in-advance (of us); the chariot of thee reining-in (thy steeds), although it has descended (to the earth), is not observed (to have done so) by-reason-of-its-not-touching the surface of the ground.' *Upoḍha-śabdāḥ=prāpta-dhvanayaḥ*, K. (cf. *upoḍha-rāga*, Vikram., Act II). *Pravartamāna* may mean 'rising in front of us' (cf. p. 11, l. 3). *Nirundhataḥ=nigṛihṇataḥ*, K. *Na lakshyate*, see p. 70, n. 3 at the end. In Vikram., Act I, when the car of Purūravas touches the ground, the direction is *rathāvatāra-kshobhaṃ nāṭayantī*, 'acting the concussion (caused) by the descent of the chariot.' Such, Mātali remarks, is the difference between the car of Indra and that of mortal heroes.

[1] 'Where stands yon sage, towards [facing] the sun's orb, immovable as the trunk-of-a-tree, (his) body half-buried in an ant-hill, with (his) breast closely-encircled by a snake's-skin, round the throat excessively pinched by a necklace (formed) of the tendril of a withered creeper, wearing a circular-mass-of-matted-hair enveloping (his) shoulders (and) filled with bird's-nests.' *Valmīkārdha*, &c., so read K. and the Mackenzie MS.; the other Deva-n., *valmīkāgra*. *Valmīka* (=*kṛimi-kṛita-mṛittikāćaya*) is the mound of earth thrown up by the large ants of India. These hillocks sometimes rise, in Bengal, to the height of eight or ten feet, and are held sacred; (see Manu iv. 46. 238.) Such was the immovable impassiveness of this ascetic, that the ants had thrown up their mound as high as his waist, without being disturbed, and the birds had built their nests in his hair. *Saṅdashṭa-s°=āślishṭa-nirmokena*, cf. p. 120, n. 3. The serpent's skin was used by the ascetic in place of the regular Brahmanical cord, called *yajñopavīta*; see Indian Wisdom, p. 201. *Latā-pratāna=latā-san-*

Verse 175. ŚĀRDŪLA-VIKRĪḌITA (a variety of ATIDHṚITI). See verses 14, &c., 172.

राजा ।

नमस्ते कष्टतपसे[1] ।

मातलिः ॥ संयतप्रग्रहं रथं कृत्वा ॥

महाराज। एतावददितिपरिवर्धितमन्दारवृक्षं[2] प्रजापतेराश्रमं प्रविष्टौ स्वः ।

राजा ।

स्वर्गादधिकतरं निर्वृत्तिस्थानम् । अमृतह्रदमिवावगाढोऽस्मि[3] ।

मातलिः ॥ रथं स्थापयित्वा ॥

अवतरत्वायुष्मान् ।

राजा ॥ अवतीर्य ॥

मातले । भवान्कथमिदानीम्[4] ।

मातलिः ।

संयन्त्रितो मया रथः । वयमप्यवतरामः । ॥ तथा कृत्वा ॥ इत आयुष्मन् । ॥ परिक्रम्य ॥ दृश्यन्तामत्रभवतामृषीणां तपोवनभूमयः ।

---

tāna, 'the spreading part of a creeper.' *Jaṭā-maṇḍala* is the circle or bundle of matted entangled hair which ascetics allowed to grow on the crown of their heads, and which fell in long clotted tresses over the back and shoulders. *Jaṭā* is, especially, S'iva's hair so plaited and arranged, through which the Ganges meandered before its descent upon the earth. *Nićitam* = *pūritam*, K. *Sthāṇuḥ* = *śākhā-hīnas taru-skandhaḥ*. *Abhyarkavimbam* = *sūrya-maṇḍalābhimukham*, K. The Mackenzie MS. has *adhyarka*°.

[1] *Kashṭam kṛićchraṃ tapo yasya sa tathoktaḥ*, K.

[2] 'Possessed of the Mandāra-tree reared by Aditi.' This was one of the five trees of Svarga (see p. 272, n. 1), and is probably the tree intended here, as, in verse 176, the Kalpa tree also is said to have graced Kaśyapa's retreat, which the commentator thence infers to have been located in part of Svarga. *Mandāra*, 'the coral tree,' may also mean 'swallow-wort.'

[3] *Amṛita*, 'the beverage of immortality,' 'the nectar' of the Hindū gods, supposed to be a liquid substance distilled by the moon, who is thence called *amṛita-sū*, 'nectar-producer;' *amṛitādhāra*, 'nectar-repository.'

[4] *Avatarishyati iti śeshaḥ*, S.; i. e. supply *avatarishyati*.

राजा ।

ननु विस्मयादवलोकयामि ।

प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने
 तोये काञ्चनपद्मरेणुकपिशे धर्माभिषेकक्रिया ।
ध्यानं रत्नशिलातलेषु विबुधस्त्रीसन्निधौ संयमो
 यत्काङ्क्षन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी[1] ॥१७६॥

मातलिः ।

उत्सर्पिणी खलु महतां प्रार्थना[2] । ॥ परिक्रम्य । आकाशे[3] ॥ अये वृद्धशाकल्य । किमनुतिष्ठति भगवान्मारीचः । किं ब्रवीषि[3] । दाक्षायण्या पतिव्रताधर्ममधिकृत्य पृष्टस्तस्यै महर्षिपत्नीसहितायै कथयतीति[4] ।

---

[1] '(The place) to which other sages aspire by (their) penances, (where there is) habitual [suitable, adequate] support of life by air in a grove in-which-the-Kalpa-tree-is-found; (where there is) the performance of religious ablutions in water, brown with the dust of the golden lotus; (where there is) meditation (while seated) on jewelled slabs of marble, (and) restraint (of the passions) in the presence of celestial nymphs; in (such a place as) this these (sages) are performing penance.' *Prāṇānām vṛittiḥ=jīvanam*, K. The Hindūs imagine that supporting life upon air is a proof of the highest degree of spirituality to which a man can attain. *Sat-kalpa-vṛikshe=vidyamāna-kalpa-drume*, K.; *=vidyamāna-kalpa-tarau*, S'. and C. The Colebrooke MS. has *sankalpa-vṛikshe;* this use of *sat* is noticeable. *S'ilā-tala*, 'the surface of a stone slab or seat;' cf. p. 76, l. 3. *Vibudha-strī=divyānganā*, K. *Saṃyama=niyatendriyatva*, K. *Ebhiḥ sat-kalpa-vṛikshatvādikair viśeshair ayam pradeśaḥ svarga iti pratīyate*, 'by these attributes of the Kalpa tree, &c., it is inferred that this place was part of Svarga,' K. As to the Kalpa tree, see p. 272, n. 1. *Yat*, &c., i.e. *yat sthānam anye kāṅkshanti tasmin svarga-pradeśe amī munayas tāni phalāni parihṛitya tapasyanti iti anena teshām mokshārthitvaṃ gamyate*, K.

[2] 'Verily the aspirations [desire] of the great soar upwards [are ever mounting upwards].' *Utsarpiṇī=udgamana-śīlā=atiśayinī*, K.

[3] As to *ākāśe* and *kim bravīshi*, see p. 96, n. 3.

[4] 'Being questioned by Dākshāyaṇī [i. e. his wife Aditi] respecting the

Verse 176. ŚĀRDŪLA-VIKRĪḌITA. See verses 14, 30, 36, 39, 40, 63, 79, 85, &c., 175.

राजा ॥ कर्णं दत्त्वा ॥

अये । प्रतिपाल्यावसराः खलु मुनयः[1] ।

मातलिः ॥ राजानमवलोक्य ॥

अस्मिन्नशोक[2]वृक्षमूले तावदास्तामायुष्मान् । यावत्त्वामिन्द्रगुरवे निवेदयितुमन्तरा[3]न्वेषी भवामि ।

राजा ।

यथा भवान्मन्यते । ॥ इति स्थितः ॥

मातलिः ।

आयुष्मन् । साधयाम्यहम्[4] । ॥ इति निष्क्रान्तः ॥

---

duties [duty] of a wife devoted to her husband, he is recounting them [it] to her, in company with the wives of the Maharshis.' *Dākshāyaṇī* is a patronymic applicable to any of the daughters of Daksha (see p. 279, n. 3). *Pati-vratā*, cf. p. 241, n. 3. *Adhikṛitya*, see p. 6, n. 2. *Maharshi*, 'a great saint;' the Maharshi was one step in advance of the Ṛishi or simple 'saint.' The classification of Ṛishis varies, but the following seems to be the usual gradation: 1. Ṛishi; 2. Maharshi; 3. Paramarshi; 4. Devarshi; 5. Brahmarshi. Amara mentions two other orders, Kāṇḍarshis and S'rutarshis. The Rājarshi was a mixed order (see p. 39, n. 3).

[1] 'We must await the leisure of saints.' So reads the Mackenzie MS., supported, apparently, by K. *Munayaḥ* is of course the nominative, but such is the terseness of compounds like *pratipālyāvasarāḥ* that a literal English translation is impossible. The other Deva-n. have *pratipālyāvasaraḥ khalu prastāvaḥ*.

[2] The Aśoka (Jonesia Asoka) is one of the most beautiful of Indian trees. Sir W. Jones observes that 'the vegetable world scarce exhibits a richer sight than an Aśoka tree in full bloom. It is about as high as an ordinary cherry tree.' The flowers are very large, and 'beautifully diversified with tints of orange-scarlet, of pale yellow, and of bright orange, which form a variety of shades according to the age of the blossom.'

[3] 'Opportune time' is one of the meanings of *antara*. As to *gurave*, cf. p. 173, n. 3 in the middle. Kaśyapa was the reputed father of Indra.

[4] 'I go-to-do (what I proposed),' 'I will-do (as I said);' cf. p. 213, l. 1, and p. 17, l. 8,

राजा ॥ निमित्तं सूचयित्वा[1] ॥

मनोरथाय नाशंसे किं बाहो स्पन्दसे वृथा ।
पूर्वावधीरितं श्रेयो दुःखं हि परिवर्तते[2] ॥१७७॥

नेपथ्ये ।

[a] मा खु चावलं करेहि । कहं गदो एव्व अत्तणो पक्किदिं[3] ।

राजा ॥ कर्णं दत्त्वा ॥

अभूमिरियमविनयस्य[4] । को नु खल्वेष निषिध्यते ।
॥ शब्दानुसारेणावलोक्य । सस्मितम् ॥ अये । को नु खल्वयमनुबध्यमानस्तपस्विनीभ्याममबालसत्त्वो बालः[5] ।

अर्धपीतस्तनं मातुरामर्दक्लिष्टकेशरम् ।
प्रक्रीडितुं सिंहशिशुं बलात्कारेण कर्षति[6] ॥१७८॥

[a] मा खलु चापलं कुरु । कथं गत एवात्मनः प्रकृतिम् ।

---

[1] *Nimittaṃ sūćayitvā* (=*śakunaṃ nirūpya*, K.), see p. 20, n. 4.

[2] 'I expect not to (obtain my) desire; why, O arm, throbbest thou (thus) vainly? For happiness formerly scorned turns to misery.' K. observes that *manorathāya* here=*manoratham prāptum*, and refers to Pāṇ. ii. 3, 14; so *phalebhyo yāti*=*phalāny āhartuṃ yāti*. As to the throbbing of the arm, see p. 20, n. 5. *Śreyaḥ*=*śubham*, i. e. *Śakuntalā-rūpam*, 'consisting of Śakuntalā,' K. *Hi parivartate*, K. has *viparivartate* and *sat parivartate*.

[3] 'Act not so wildly [do not commit such a wild, wilful act]. What! has he gone already to his own nature?' Cf. Raghu-v. iii. 42. *Prakṛiti*, 'one's natural character;' cf. p. 72, n. 2. *Gata*, see p. 161, n. 3 at the end.

[4] 'This is no place for petulance [insolence];' cf. p. 271, l. 11.

[5] 'Who is this child with unchild-like disposition [nature], closely attended by two female ascetics?' *Anubadhyamāna*, the Mackenzie MS. has *anugamyamāna*. *Anubandha*, lit. 'tying after,' 'following at the heels,' 'sticking closely to,' very forcibly expresses the close attendance of a nurse upon a child.

[6] 'He forcibly drags to play (with him) a lion's cub that-has-but-half-sucked-its mother's dug, (and) whose-mane-is-disordered-by-rough-handling,' or 'he forcibly drags from its mother,' &c.

Verses 177 and 178. Śloka or Anushṭubh. See verses 5, 6, 11, 12, 26, 47, 50, 51, 53, 73, 76, 84, 87, 125, 127, 146, 154, 155, 160, 164.

॥ ततः प्रविशति यथानिर्दिष्टकर्मा तपस्विनीभ्यां बालः ॥

बालः ।

[a] जिम्भ सिङ्घ । दन्ताइं दे गणइस्सं ।

प्रथमा ।

[b] अविणीद । किं णो अपच्चणिव्विसेसाणि सत्ताणि विप्पअरेसि । हन्त वड्ढइ दे संरम्भो । ठाणेक्खु इसिजणेण सव्वदमणो त्ति किदणामहेओसि ।

राजा ।

किं नु खलु बालेऽस्मिन्नौरस इव पुत्रे स्निह्यति मे मनः । नूनमनपत्यता मां वत्सलयति[2] ।

द्वितीया ।

[c] एसा खु केसरिणी तुमं लङ्घेदि[3] । जइ से पुत्तअं ण मुञ्चेसि ।

बालः ॥ सस्मितम् ॥

[d] अम्महे । बलिअंक्खु भीदोम्हि । ॥ इत्यधरं दर्शयति[4] ॥

[a] जृम्भस्व सिंह । दन्तांस्ते गणयिष्यामि । [b] अविनीत । किं नोऽपत्यनिर्विशेषाणि सत्त्वानि विप्रकरोषि । हन्त वर्धते ते संरम्भः । स्थाने खलु ऋषिजनेन सर्वदमन इति कृतनामधेयोऽसि । [c] एषा खलु केशरिणी त्वां लङ्घयति । यद्यस्याः पुत्रकं न मुञ्चसि । [d] अहो । बलीयः खलु भीतोऽस्मि ।

---

[1] 'Why dost thou teaze the animals (cherished by us as if) not-differing-from-our-offspring?' *Sattvāni*, cf. p. 55, n. 4. *Nir-viśeshāṇi*, cf. *suta-nirviśeshaḥ nakulaḥ*, 'the ichneumon dear to him as a son,' Hitop. l. 2721, and *mūshika-nirviśesha*, Hitop. l. 2395.

[2] 'It must certainly be my childlessness that causes me to yearn (towards this child).' *Vatsala* or *vātsalya* is, properly, the yearning affection of a cow for its calf, or a parent for its offspring.

[3] *Langhayati*=*ākramati*, K. Cf. p. 97, n. 1.

[4] K. quotes a passage from the Vasanta-rājīya to shew that different movements of the lips, such as biting the lip, pouting the under-lip, &c., were significant of various emotions. The text is corrupt, but it appears that *adhara-darśana*=*adhara-prasāraṇa* is [*an-ādare*] a gesture of contempt. Cf. Psalm xxii. 7, 'All they that see me laugh me to scorn; they shoot out the lip.'

राजा ।

महतस्तेजसो वीजं बालोऽयं प्रतिभाति मे ।
स्फुलिङ्गावस्थया वह्निरेधापेक्ष इव स्थितः ॥१७९॥

प्रथमा ।

[a] वच्छ । एदं बालमिइन्दअं मुञ्च । अवरं दे कीलणअं दाइस्सं ।

बालः ।

[b] कहिं । देहि णं । ॥ इति हस्तं प्रसारयति ॥

राजा ।

कथं चक्रवर्तिलक्षणमप्यनेन[2] धार्यते । तथा ह्यस्य

प्रलोभ्यवस्तुप्रणयप्रसारितो
विभाति जालग्रथिताङ्गुलिः करः ।
अलक्ष्यपत्त्रान्तरमिद्धरागया
नवोषसा भिन्नमिवैकपङ्कजम्[3] ॥१८०॥

[a] वत्स । एतं बालमृगेन्द्रकं मुञ्च । अपरं ते क्रीडनकं दास्यामि । [b] कुत्र । देह्येनम् ।

---

[1] 'This child appears to me (to possess) the germ [rudiment] of mighty energy [spirit, courage]. He stands like fire in a state of scintillation [in a smouldering state], waiting (only) for fuel (that it may blaze up).' *Edhāpekshaḥ=indhanāni kāṅkshiṇī*, K. The Bengālī MSS. have *edhaḥ-kshayaḥ*.

[2] 'The mark of a universal emperor;' see p. 15, n. 2, and p. 214, n. 2.

[3] 'His hand stretched forth to beg for a coveted object, having the fingers connected by a web, appears like [shines like] a single lotus-blossom, the spaces between whose petals is imperceptible, expanded by the early dawn, whose-glow-is-just-kindled.' *Praṇaya=prārthana*, S'. *Jāla*, &c.; *jāleshu antareshu grathitāḥ saṁhatā aṅgulayo yasya*, K. For *grathitāṅguliḥ*, S'. has *saṁhatāṅguliḥ=saṁślishṭāṅguliḥ*, and remarks

---

Verse 179. ŚLOKA OR ANUSHṬUBH. See verses 5, 6, 11, 12, 26, 47, 50, 51, &c., 178.
Verse 180. VAṄŚA-STHAVILA (a variety of JAGATĪ). See verses 18, 22, 23, &c., 174.

द्वितीया ।

[a] सुव्वदे । ण सक्को एसो वाआमेत्तेण विरमाबिदुं । गच्छ । मम केरए[1] उडए मक्कण्डेअस्स इसिकुमारअस्स वण्णचित्तिदो मित्तिआमोरओ चिट्ठदि । तं से उबहर ।

पढमा ।

[b] तह । ॥ इति निष्क्रान्ता ॥

[a] सुव्रते । न शक्य एष वाचामात्रेण विरमयितुम् । गच्छ । मदीय उटजे मार्कण्डेयस्य ऋषिकुमारस्य वर्णचित्रितो मृत्तिकामयूरकस्तिष्ठति । तमस्योपहर । [b] तथा ।

---

that a hand whose fingers were thus united was indicative of great valour (*mahā-purushatva*). He adds *jāla-pāda-bhujāviti nara-nārāyaṇa-viśeshaṇam uktam*, 'webbed-feet and webbed-hands are said to be characteristics of Nara and Nārāyaṇa.' Hindū poets reckon thirty-two marks of greatness, and he who possessed them all was said to be *dvātrinśal-lakshaṇopetaḥ*. The child's fingers, being drawn together by this membrane or web, would bear some resemblance to an expanding lotus-flower, the fingers answering to the long petals, which would be only separated towards the top. This seems to be the sense: my first inclination was to translate, 'having the fingers regularly marked with reticulated lines,' or 'having the fingers drawn together into (the form of) a bud.' *Alakshya* (=*adṛiśya*, K.), so read all the Deva-n. MSS. excepting my own, which has *ālakshya*, with the Beng.; S'., however, has *alakshya*. *Pattrāntaram* =*dala-vivaram*, K. and S'.. *Iddha-rāgayā navoshasā*, &c.; *ushas*, 'the dawn,' is usually neuter in classical Sanskṛit. In the Vedas, as here, it is feminine. Thus in Ṛig-v. i. 46, 1, *Esho ushā apūrvyā vyuććhati priyā divaḥ;* see also Ṛig-v. i. 48, 3. 5. 7. 8. 13; i. 62, 8; i. 92, 4; and i. 113, 4, &c. It is possible that the feminine noun *ushā* may form its vowel cases from *ushas*, as *jarā* from *jaras;* nom. *jarā, jarasau, jarasaḥ;* instr. *jarasā, jarābhyām, jarābhiḥ*, &c. (see Gram. 171). The following is the corrupt gloss of S'.: *ushaḥ-pratyushasi klīvaṁ pihaprasvāntu yoshatīti koshaḥ*. K. explains *navoshasā* as a Bahuvrīhi, 'by the early-dawned one,' *navam usho yasyāḥ sā navoshā prātaḥsandhyā tayā bhinnaṃ vikasitam*. As to *paṅkaja*, see p. 213, n. 2.

[1] This pleonastic word, according to Lassen (Instit. Prāk. p. 118), is derived from the Sanskṛit *kṛite*, and is equivalent to *pertinens ad*, 'in the cottage belonging to me,' &c. Some MSS. omit the word.

बालः ।

[a] इमिणा एव्व दाव कीलिस्सं । ॥ इति तापसीं विलोक्य हसति ॥

राजा ।

स्पृहयामि खलु दुर्ललिता[1]यास्मै ।
आलक्ष्यदन्तमुकुलाननिमित्तहासै-
रव्यक्तवर्णरमणीयवचःप्रवृत्तीन् ।
अङ्काश्रयप्रणयिनस्तनयान्वहन्तो
धन्यास्तदङ्गरजसा मलिनीभवन्ति[2] ॥१८१॥

[a] अनेनैवं तावत्क्रीडिष्यामि ।

---

[1] 'I have a great fancy for this unmanageable (child).' *Durlalita*, i. e. *durlabham īpsitaṃ yasya* (S.), 'difficult to be coaxed or pleased,' 'wayward,' 'naughty.' K. reads *durlasitāya* and interprets by *dhūrtāya*, 'roguish,' 'mischievous.' The causal sense of the root *lal* is 'to coax,' though *dur-lālita* might then be expected. The primitive idea is certainly that of 'sporting,' 'toying,' 'taking pleasure,' as in the root *las*. So in Vikram., Act II, the king complains that his eye-sight has become *durlalitam*, i. e. 'difficult to be pleased,' 'fastidious,' by looking on Urvaśī, and that the beauties of Nature have no longer any charms for him; *upavana-latāsu ćakshur na badhnāti dhṛitiṃ tad-anganāloka-durlalitam.* The commentator there explains the word by *dur-āgrastam.* In Sāhit.-d. p. 193, l. 1, the following is cited from the Mahā-bh.: *Dhik dhik sūta kiṃ kṛitavān asi vatsasya me prakṛiti-durlalitasya*, where *durlalita* is explained by *durvilasita*.

[2] 'Happy (those parents who), carrying (their) little-sons fondly-soliciting-a-refuge-in-their-lap, having-buds-of-teeth-just- [scarcely, slightly] visible by their innocent [causeless, without reason] smiles, while-attempting-charming-prattle-in-indistinct-accents, are soiled by the dust of their (infantine) limbs!' *Ā-lakshya*, *ā* is here the prefix of diminution (see p. 228, n. 1). *Praṇayinaḥ=prārthakāḥ*, S. and C. *Malinī*, the Beng. have *parushī*. This is the verse with which Chézy is enraptured: '. . . strophe incomparable, que tout père, ou plutôt toute mère, ne pourra lire sans sentir battre son cœur, tant le poète a su y rendre, avec les nuances les plus délicates, l'expression vivante de l'amour maternel.'

Verse 181. VASANTA-TILAKĀ (a variety of ŚAKVARĪ). See verses 8, 27, 31, &c., 170.

तापसी ।

[a] होदु । ण मं अअं गणेदि । ॥ पार्श्वमवलोकयति ॥ [b] को एत्थ इसिकुमाराणं । ॥ राजानमवलोक्य ॥ [c] भद्दमुह[1] । एहि दाव । मोएहि इमिणा दुम्मोअहत्थग्गाहेण डिम्भलीलाए बाहीअमाणं बालमिइन्दअं[2] ।

राजा ॥ उपगम्य । सस्मितम् ॥

अयि भो महर्षिपुत्र ।

एवमाश्रमविरुद्धवृत्तिना
संयमः किमिति जन्मतस्त्वया ।
सत्त्वसंश्रयसुखोऽपि दूष्यते
कृष्णसर्पशिशुनेव चन्दनम्[3] ॥१८२॥

[a] भवतु । न मामयं गणयति । [b] कोऽत्र ऋषिकुमाराणाम् । [c] भद्रमुख । एहि तावत् । मोचयानेन दुर्मोचहस्तग्राहेण डिम्भलीलया बाध्यमानं बालमृगेन्द्रकम् ।

---

[1] 'O gentle sir,' lit. 'O thou with auspicious countenance.' According to the Sāhit.-d. (p. 179, l. 16) *bhadra-mukha* and *saumya* are the titles used by the inferior characters in addressing the king's son: *saumya bhadra-mukhety evam adhamais tu kumārakaḥ.* They do not seem to be so restricted, as in Act V. the Beng. MSS. make Gautamī address the king himself as *bhadra-mukha;* and K. extends the application of both terms to any *mānya*, honourable person: *Bhadra-mukheti mānyasyāmantraṇe yathoktaṃ saumya bhadra-mukhety evam mānyo rājñaḥ suto vā.*

[2] 'Release the young lion being tormented in childish play by this (boy) the-grasp-of-whose-hand-is-difficult to unloose.' Some MSS. have *maindam* or *maindaam* for *mṛigendram;* the Mackenzie, *miindam.*

[3] 'How is it that by thee, whose behaviour is opposed to (the peaceful character of) a hermitage, (thy) father's humanity [forbearance], that-delights-in-the-protection-of-the-animals, is thus outraged; like the sandal-tree by the young of the black serpent?' *Āśrama-viruddha*, cf. p. 38, l. 5. *Saṃyama*=*śama*, K., 'a vow to forbear hurting animals.' *Kim iti*=*kim-*

Verse 182. RATHODDHATĀ (a variety of TRISHṬUBH), containing eleven syllables to the Pāda or quarter-verse, each Pāda being alike.

— ᴗ — ᴗ ᴗ ᴗ — ᴗ — ᴗ — ||

तापसी ।

[a] भद्दमुह । ण हु अअं इसिकुमारओ ।

राजा ।

आकारसदृशं चेष्टितमेवास्य कथयति[1] । स्थानप्रत्ययात्तु वयमेवंतर्किणः ।

॥ यथाभ्यर्थितमनुतिष्ठन्बालस्पर्शमुपलभ्य । आत्मगतम् ॥

अनेन कस्यापि कुलाङ्कुरेण
स्पृष्टस्य गात्रेषु सुखं ममैवम् ।
कां निर्वृतिं चेतसि तस्य कुर्या-
द्यस्यायमङ्गात्कृतिनः प्ररूढः[2] ॥१८३॥

[a] भद्रमुख । न खल्वयमृषिकुमारः ।

---

artham, K.; *iti* is frequently thus joined with *kim* (compare p. 71, l. 1). *Janmanas*=*janmano hetoḥ*, K. So *prabhava*=*janma-hetu*, p. 44, l. 4, n. 1; otherwise I should translate 'from thy birth.' The Beng. MSS. have *janmadas* and *sanyamī* agreeing with it. *Sukho*, the Mackenzie and K. have *guṇo* (=*dharmaḥ*, K.) *Ćandanam*, as to the sandal, see p. 175, n. 1. This celebrated tree seems to have paid dearly for the fragrance of its wood: 'The root is infested by serpents; the blossoms by bees; the branches by monkeys; the summits by bears. In short, there is not a part of the sandal-tree which is not occupied by the vilest impurities' (Hitop., Book II, verse 163).

[1] 'His behaviour, (which is) conformable to his mien, says as much [bespeaks it, betokens it].' *Kathayati*, compare p. 224, l. 7.

[2] 'Such (being) the-thrill-of-delight in the limbs of me touched by this scion of the family of some one (unknown to me); what bliss must he cause in the heart of that happy-man from whose body [loins] he sprang!' Hindū poets are fond of alluding to the thrilling effect of the touch of a child on the limbs of its parent, and *vice versâ*. Compare the parallel passages in the Vikram., Act V, and the following from the Mahā-bh., *Putra-sparśāt sukhataraḥ sparśo loke na vidyate*. *Aṅgāt*, some MSS., including my own, have *aṅkāt*, 'from whose loins.' *Kṛitinaḥ*=*bhāgyavataḥ*, 'fortunate.' *Kṛitin* is properly 'one who has accomplished the desire of his heart.'

Verse 183. Upajāti or Ākhyānakī (a variety of Trishṭubh). See verses 41, &c., 169.

तापसी ॥ उभौ निर्वर्ण्य ॥

[a]अच्छरिअं अच्छरिअं ।

राजा ।

आर्ये । किमिव ।

तापसी ।

[b]इमस्स बालअरूवस्स देवि संवादिणी आकिदि[1]त्ति विम्हाविदम्हि । अपरिइदस्सवि दे अप्पडिलोमो संवुत्तोत्ति ।

राजा ॥ बालमुपलालयन्[2] ॥

न चेन्मुनिकुमारोऽयं । अथ कोऽस्य व्यपदेशः[3] ।

तापसी ।

[c]पुरुवंसो ।

राजा ॥ आत्मगतम् ॥

कथमेकान्वयो मम । अतः खलु मदनुकारिणमेनमत्रभवती मन्यते । अस्त्येतत्पौरवाणामन्त्यं कुलव्रतम् ।

भवनेषु रसाधिकेषु पूर्वं
क्षितिरक्षार्थमुशन्ति ये निवासम् ।
नियतैकयतिव्रतानि पश्चा-
त्तरुमूलानि गृहीभवन्ति तेषाम् ॥१८४॥

॥ प्रकाशम् ॥

[a] आश्चर्यम् आश्चर्यम् । [b] अस्य बालकरूपस्य तेऽपि संवादिन्याकृतिरिति विस्मापितास्मि । अपरिचितस्यापि तेऽप्रतिलोमः संवृत्त इति । [c] पुरुवंशः ।

---

[1] 'The speaking-resemblance of form;' 'la ressemblance parlante,' Chézy.

[2] *Upalālayan*, 'fondling;' see p. 289, n. 2.

[3] *Vyapadeśaḥ*, 'family;' see p. 205, n. 1.

[4] 'This (custom of retiring to a hermitage) is the last family-observance of the descendants of Puru. (They) who first of all for the sake of protecting the earth choose a residence in palaces abounding-in-all-the-

Verse 184. AUPAĆĆHANDASIKA. See verses 77, 78.

न पुनरात्मगत्या मानुषाणामेष विषयः ।

तापसी ।

[a] जह भद्दमुहो भणादि । [2] अच्छरासम्बन्धेण इमस्स जणणी एत्थ [2] देवगुरुणो तवोवणे पसूदा ।

राजा ॥ अपवार्य ॥

हन्त द्वितीयमिदमाशाजननम् । ॥ प्रकाशम् ॥ अथ सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी ।

तापसी ।

[b] को तस्स धम्मदारपरिच्चाइणो णाम सङ्कीतिदुं चिन्तिस्सदि ।

राजा ॥ स्वगतम् ॥

इयं खलु कथा मामेव लक्षीकरोति । यदि तावदस्य

[a] यथा भद्रमुखो भणति । अप्सरःसम्बन्धेनास्य जनन्यत्र देवगुरोस्तपोवने प्रसूता ।
[b] कस्तस्य धर्मदारपरित्यागिनो नाम सङ्कीर्तितुं चिन्तयिष्यति ।

---

pleasures-of-sense, to them [of them] the roots of trees, where the one religious vow of ascetics [i. e. control of the passions, mortification] is rigidly maintained, become a dwelling-place.' *Rasādhikeshu*, the Bengālī MSS. have *sudhāsiteshu*, 'white with stucco or chunam.' *Uśanti* (3rd pl. pres. of *vaś*, Gram. 324, 656)=*iććhanti*, S.;=*vāńćhanti*, K. *Taru-mūlāni*, so Manu enjoins that the hermit is to be *vijitendriyo dharāśayo vṛiksha-mūla-niketanaḥ*, 'his passions kept in subjection, sleeping on the bare ground, dwelling at the roots of trees,' vi. 26. It seems to have been a practice in ancient India for kings when they had reigned sufficiently long, to retire from the charge of government and betake themselves to penitential exercises. They first associated the Yuva-rāja or heir-apparent with themselves, and then left him in quiet possession of the throne.

[1] 'But this (sacred) place is not (accessible) to mortals by their own means [condition].' *Vishayaḥ=pradeśaḥ*, Chézy. The Mackenzie MS. has *kat͟ham* for *na*.

[2] 'In consequence of her relationship to a nymph.' *Deva-guros=Kaśyapasya.*

शिशोर्मातरं नामतः पृच्छेयम् । ॥ विचिन्त्य ॥ अथवा । अन्याय: परदारपृच्छाव्यापार:[1] ।

तापसी ॥ प्रविश्य मृन्मयूरहस्ता ॥

[a] सव्वदमण । सउन्दला[2]वस्सं पेक्ख ।

बालः ॥ सदृष्टिक्षेपम् ॥

[b] कहिं वा मे अ[3]ज्जा ।

उभे ।

[c] णामसारिस्सेण वञ्चिदो माउवच्छलो

द्वितीया ।

[d] वच्छ । इमस्स मित्तिआमोरअस्स रम्मत्तणं देक्खत्ति भणिदोसि ।

राजा ॥ आत्मगतम् ॥

किं वा शकुन्तलेत्यस्य मातुराख्या । सन्ति पुनर्नामधेयसादृश्यानि । अपि नाम मृगतृष्णिकेव नाममात्रप्रस्तावो मे विषादाय क[4]ल्पते ।

[a] सर्वदमन । शकुन्तलावण्यं प्रेक्षस्व । [b] कुत्र वा मे अम्बा । [c] नामसादृश्येन वञ्चितो मातृवत्सलः । [d] वत्स । अस्य मृत्तिकामयूरकस्य रम्यत्वं पश्येति भणितोऽसि ।

---

[1] So reads the Mackenzie MS. The others *tarhy anāryaḥ para-dāra-vyavahāraḥ.*

[2] *S'akunta=pakshin,* 'a bird.' By joining it with *lāvaṇyam,* the hermitess unconsciously pronounces S'akuntalā. *S'akuntasya pakshiṇo lāvaṇyam. Sakunta-lāvaṇyam śleshena S'akuntalā-śabdaḥ uktaḥ,* Chézy.

[3] For *ambā* (the reading of the Mackenzie MS., supported by K.) some have *ajjū* for Sanskrit *ajjukā,* and again, subsequently, *ajjuā* for *ajjukā,* where K. has *ajjaā* for *āryakā* or *āryā.* I have everywhere followed K. in rejecting *ajjukā,* as, according to Amara-k. (i. 1, 7, 11) and Sāhit.-d. (p. 179 at the end), this word, in theatrical language, is applied only to a *veśyā* or harlot.

[4] 'Perhaps the mention of a mere name, like the mirage-of-the-desert, is destined to (cause) me bitter-disappointment.' *Mṛiga-tṛishṇikā,* see

बालः ।

[a] अज्जए । रोअदि मे एसो भद्दमोरओ[1] । ॥ इति क्रीडनकमादत्ते ॥

प्रथमा ॥ विलोक्य । सोद्वेगम् ॥

[b] अम्हहे । रक्खाकरंडअं[2] से मणिबन्धे ण दीसदि ।

राजा ।

अलमलमावेगेन । नन्विदमस्य सिंहशावविमर्दात्परिभ्रष्टम् । ॥ इत्यादातुमिच्छति ॥

उभे ।

[c] मा खु मा खु । एदं अविलम्बिअ कहं गहिदं णेण ।

॥ इति विस्मयादुरोनिहितहस्ते परस्परमवलोकयतः ॥

राजा ।

किमर्थं प्रतिषिद्धाः स्मः ।

प्रथमा ।

[d] सुणादु महाराओ । एसा अवराजिदा[3] णाम ओसही इमस्स

[a] आर्यके । रोचते म एष भद्रमयूरकः । [b] अहो । रक्षाकरण्डकमस्य मणिबन्धे न दृश्यते । [c] मा खलु मा खलु । एतदविलम्ब्य कथं गृहीतमनेन । [d] शृणोतु महाराजः । एषापराजिता नामौषधिरस्य

---

p. 250, n. 1 at the end. *Nāma-mātra-prastāvo* may mean 'the occasion of a mere name,' but the verb *pra-stu* has the sense of 'mentioning,' 'declaring.' *Kalpate*, 'is sufficient,' or simply 'becomes a cause of;' cf. p. 191, l. 5; p. 260, l. 12.

[1] A peacock, whether living or in the form of a toy, seems to have been a favourite plaything. So the boy in the fifth Act of the Vikramorvaśī, *yaḥ suptavān madaṅke tam me jāta-kalāpam preshaya śikhinam.* For *āryake* the Beng. have *antike.* *Antikā=bhaginī jyeshṭhā=dhātrī*, S.

[2] 'The amulet,' 'the talisman,' lit. 'the guardian casket,' 'the magical casket.' One sense, however, of *karaṇḍaka* is 'a kind of plant' or 'herb' (cf. next note). It was probably a kind of locket, containing some herb with talismanic properties, worn round the waist, to serve as an amulet. *Karaṇḍaka* certainly usually signifies 'a little box,' but it may possibly be the name for the herb itself. K. explains it by *rakshā-ghuṭikā* [? *guṭikā*], 'a magical ball.' Some of the Beng. have *rakshā-kāṇḍo;* S. and C., *rakshā-gaṇḍo* and *rakshā-gaṇḍako.*

[3] 'This herb, called Aparājitā [unconquered, invincible], was given

[a]जादकम्मसमए भअवदा मारीएण दिण्णा । एदं किल मादापिदरो अप्पाणं च वज्जिअ अवरो भूमिपडिदं ण गेण्हादि ।

राजा ।

अथ गृह्णाति ।

प्रथमा ।

[b]तदो तं सप्पो भविअ दंसइ ।

राजा ।

भवतीभ्यां कदाचिदस्याः प्रत्यक्षीकृता विक्रिया ।

उभे ।

अणेअसो ।

राजा ॥ सहर्षम् । आत्मगतम् ॥

कथमिव सम्पूर्णमपि मे मनोरथं नाभिनन्दामि ।

॥ इति बालं परिष्वजते ॥

द्वितीया ।

[d]सुव्वदे । एहि । इमं वुत्तन्तं णिअमव्वावुडाए सउन्दलाए णिवेदेम्ह । ॥ इति निष्क्रान्ते ॥

बालः ।

[e]मुञ्च मं । जाव अम्बाए सआसं गमिस्सं ।

[a] जातकर्मसमये भगवता मारीचेन दत्ता । एतां किल मातापितरावात्मानं च वर्जयित्वापरो भूमिपतितां न गृह्णाति । [b] ततस्तं सर्पो भूत्वा दशति । [c] अनेकशः । [d] सुव्रते । एहि । इमं वृत्तान्तं नियमव्यापृतायै शकुन्तलायै निवेदयावः । [e] मुञ्च माम् । यावदम्बायाः सकाशं गमिष्यामि ।

---

by his reverence Kaśyapa to this child, on the occasion of the natal (ceremony).' As to the name *aparājitā*, compare p. 266, n. 2. The *jātakarman* is the fourth of the twelve Sanskāras or purificatory rites, described in Manu (ii. 27, &c.), and the first after the child's birth (cf. p. 258, n. 2; p. 199, n. 1). It was performed by giving the child honey and clarified butter out of a golden spoon, before separating the navel-string.

[1] *Atha* here=*yadi tu*, 'supposing now,' 'but if' (cf. *atha tu*, verse 128).

राजा ।

पुत्रक । मया सहैव मातरमभिनन्दिष्यसि ।

बालः ।

[a] ममक्खु तादो दुस्सन्दो । ण तुमं ।

राजा ॥ सस्मितम् ॥

एष विवाद एव प्रत्याययति[1] ।

॥ ततः प्रविशत्येकवेणीधरा[2] शकुन्तला ॥

शकुन्तला ।

[b] विआरकालेवि[3] पकिदित्थं सव्वदमणस्स ओसहिं सुणिअ ण मे आसा आसि अत्तणो भाअहेएसु[4] । अहवा जह साणुमदीए आचक्खिदं[5] । तह सम्भावीअदि एदं ।

राजा ॥ शकुन्तलां विलोक्य ॥

अये । सेयमत्रभवती शकुन्तला । यैषा

वसने परिधूसरे वसाना
नियमक्षाममुखी धृतैकवेणिः ।

[a] मम खलु तातो दुष्यन्तः । न त्वम् ।   [b] विकारकालेऽपि प्रकृतिस्थां सर्वदमनस्यौषधिं श्रुत्वा न म आशासीदात्मनो भागधेयेषु । अथवा यथा सानुमत्याचक्षितम् । तथा सम्भाव्यत एतत् ।

---

[1] 'Even this contradiction convinces me.' *Pratyāyayati*, 'causes me to believe,' 'me inducit ad credendum' (cf. p. 216, l. 12).

[2] *Eka-veṇī-dharā*, cf. Megha-d. verse 90, *sārayantī eka-veṇīṃ kareṇa*; and verse 98, *abalā-veṇi-mokshotsukāni*. The Hindū women collect their hair into a single long braid, as a sign of mourning, when their husbands are dead, or absent for a long period.

[3] 'Even at the time of metamorphose,' i. e. even on an occasion when it ought to have changed its form. As to *prakṛiti*, 'the natural form or state,' as opposed to *vikāra*, cf. p. 71, l. 10. *Oshadhi*, see p. 295, n. 3.

[4] 'I had no hope in my own destiny,' 'I had no trust in my fortunes.'

[5] Compare p. 262, lines 7 and 8.

अतिनिष्करुणस्य शुद्धशीला
मम दीर्घं विरहव्रतं बिभर्त्ति[1] ॥१८५॥

शकुन्तला ॥ पश्चात्तापविवर्णं राजानं दृष्ट्वा ॥

[a] णक्खु अज्जउत्तो[2] विअ । तदो को एसो दाणिं किदरक्खामङ्गलं[3] दारअं मे गत्तसंसग्गेण दूसेदि ।

बालः ॥ मातरमुपेत्य ॥

[b] अम्ब[4] । को एसो पुरिसो मं पुत्तेत्ति आलिङ्गदि ।

[a] न खल्वार्यपुत्र इव । ततः क एष इदानीं कृतरक्षामङ्गलं दारकं मे गात्रसंसर्गेण दूषयति । [b] अम्ब । क एष पुरुषो मां पुत्रेत्यालिङ्गति ।

---

[1] 'She who, wearing a pair of dark-grey vestments, having a countenance emaciated by penitential-exercises, bearing (on her head) a single braid of hair, chaste [pure] in her behaviour, undergoes a long vow of separation from me, excessively unmerciful.' *Vasane*, acc. du. neut.; see p. 158, n. 1, and cf. *vāsasī* in Mṛićchak., Act IV. It seems that men's clothes, as well as women's, consisted of two pieces (cf. Bhaṭṭi-k. iii. 20, *manorame vastre*, which in one commentary is rendered by *manoramaṃ vastra-dvayam* and in the other by *ćeto-hāriṇī vastre*). *Pari-dhūsare*, as the preposition *ā* is employed diminutively, so the prepositions *pari* and *sam* give force and intensity, much as *περί* and *σύν* in Greek, and *per* and *con* in Latin. *Pari* is even more intensitive than *sam:* thus, *sam-āpti*, 'completion,' *pari-samāpti*, 'entire completion;' *sam-pūrṇa*, 'very full,' *pari-pūrṇa*, 'completely filled;' *saṃ-śushka*, 'dried up,' *pari-śushka*, 'quite dried up;' *ā-pāṇḍu*, 'palish,' *pari-pāṇḍu*, 'very pale;' *pari-śrānta*, 'completely wearied,' &c. &c. *Dhṛitaika-veṇi*, see p. 297, n. 2. Ś. and Ć. quote the following from Bharata: *amalāsv avadhāraṇam* [? *amalā avadhāraṇam*, Ś.] *alakānāṃ ća kalpanam anulepana-saṇskāraṃ na kuryāt pathikāṅganā* ('a woman whose husband is absent on a journey,' cf. p. 230, n. 1); *pāṇḍu-ććhāyā kṛiśa-tanur veṇī-yuta-śiroruhā lambālakā dīna-veśā vibhūshaṇa-vivarjitā.*

[2] *Ārya-putra*, see p. 196, n. 4.

[3] 'Furnished with a lucky talisman,' 'protected by an auspicious amulet.'

[4] The feminine *ambā* makes its vocative *amba*, see Gram. 108. *d.*

Verse 185. AUPAĆĆHANDASIKA. See verses 77, 78, 184.

राजा।

प्रिये। क्रौर्यमपि मे त्वयि प्रयुक्तमनुकूलपरिणामं संवृत्तम्। यदहमिदानीं त्वया प्रत्यभिज्ञातमात्मानं पश्यामि।

शकुन्तला ॥ आत्मगतम् ॥

[a] हिअअ। समस्सस समस्सस। परिच्चत्तमच्छरेण अणुअम्पिदम्हि देव्वेण। अज्जउत्तो क्खु एसो।

राजा।

प्रिये।

स्मृतिभिन्नमोहतमसो दिष्ट्या प्रमुखे स्थितासि मे सुमुखि।
उपरागान्ते शशिनः समुपगता रोहिणी योगम्[1] ॥१८६॥

शकुन्तला।

[b] जेदु जेदु अज्जउत्तो। ॥ इत्यर्धोक्ते बाष्पकण्ठी[2] विरमति।

[a] हृदय। समाश्वसिहि समाश्वसिहि। परित्यक्तमत्सरेणानुकम्पितास्मि दैवेन। आर्यपुत्रः खल्वेषः। [b] जयतु जयत्वार्यपुत्रः।

---

[1] 'By-the-kindness-of-fortune, O lovely-faced-one, thou standest (once again) before me, the darkness of whose delusion is dispelled by recollection. At the end of the eclipse, Rohiṇī has been (again) brought to a union with the moon.' *Dishṭyā* is generally an exclamation equivalent to 'Hail!' 'good luck!' corresponding to Shakespeare's 'Now fair befall thee!' I have preferred to regard it here as an adverbial instr. case, 'by the kindness of destiny,' 'fortunately,' 'happily.' *Uparāga*, the following is the Hindū notion of eclipses:—A certain demon, which had the tail of a dragon, was decapitated by Vishṇu at the churning of the ocean; but, as he had previously tasted of the Amṛita or nectar reproduced at that time, he was thereby rendered immortal, and his head and tail, retaining their separate existence, were transferred to the stellar sphere. The head was called Rāhu, and became the cause of eclipses, by endeavouring, at various times, to swallow the sun and moon. *Rohiṇī*, as to the love of the Moon for Rohiṇī, the fourth lunar constellation, see p. 113. n. 1.

[2] Lit. 'having tears in her throat,' i.e. 'having her voice choked with

Verse 186. ĀRYĀ or GĀTHĀ. See verse 2.

◡ ◡ – | ◡ – ◡ | ◡ ◡ – || – – | ◡ ◡ – | ◡ – ◡ | – ◡ ◡ | ◡
◡ ◡ – | – – | ◡ ◡ – || ◡ ◡ ◡ ◡ | – – | ◡ | – – | –

राजा ।

सुन्दरि ।

वाष्पेण प्रतिषिद्धेऽपि जयशब्दे जितं मया ।
यत्ते दृष्टमसंस्कारं पाटलोष्ठपुटं मुखम्[1] ॥१८७॥

बालः ।

[a] अम्ब । को एसो ।

शकुन्तला ।

[b] वच्छ । दे भाअहेआइं पुच्छेहि ।

राजा ॥ शकुन्तलायाः पादयोः प्रणिपत्य[2] ॥

सुतनु हृदयात्प्रत्यादेशव्यलीकमपैतु ते
किमपि मनसः सम्मोहो मे तदा बलवानभूत् ।

[a] अम्ब । क एषः । [b] वत्स । ते भागधेयानि पृच्छ ।

---

tears.' *Vāshpa*, not the tear itself, but the lachrymal moisture (see p. 169, n. 2) which may find its way into the throat and impede the utterance.

[1] 'Though the (utterance-of) the word "victory" be obstructed by (thy) weeping, victory-has-been-gained by me, since thy unadorned countenance, having-the-surface- [skin] -of-its-lips-pale-red, has been seen (by me).' *Jaya-śabda*, the word 'Victory!' i.e. *jayatu* or *vijayī bhava* was the regular form of saluting kings (cf. p. 65, n. 2). *Asan̲skāram*, so reads the Taylor MS.; the others have *asan̲skāra-p°*, which violates the usual cæsura. If the latter be retained, translate 'the skin of whose lips is pale red from the absence of colouring or paint.' There is no doubt that unpainted lips were a sign of mourning, but this is sufficiently implied in *pāṭaloshṭha*, and it is a question whether *san̲skāra* can ever mean 'paint.' Some of the Beng., and amongst them the old MS. (Bodleian, 233), supported by S'. and C'., read *a-san̲skārāl lolālakam idam mukham*, 'this countenance, having its curls hanging loosely from want of dressing.' *Oshṭha-puṭa*, 'the covering of the lip;' so *akshi-puṭa*, 'the skin covering the eye,' 'the eye-lid.' The student is reminded that in a compound, *oshṭha* optionally causes the elision of a preceding *a* (Gram. 38. *k*). The Mackenzie MS. has *pāṭaloshṭham mukham priye*.

[2] S'aṅkara quotes the following from Bharata: *Kākubhiḥ praṇipātaiś ća bhāgya-nindādibhis tathā, evaṃ kṛite ća narīṇām purusho 'ti-priyo bhavet.*

Verse 187. Śloka or Anushṭubh. See verses 5, 6, 11, 12, 26, 47, 50, 51, &c., 179.

प्रबलतमसामेवम्प्रायाः शुभेषु हि वृत्तयः
स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया[1] ॥१८८॥

शकुन्तला ।

[a] उट्ठेदु अज्जउत्तो । णूणं मे सुअरिअप्पडिबन्धअं पुराकिदं तेसु दिअहेसु परिणाममुहं आसि । जेण साणुक्कोसो वि अज्जउत्तो मइ विरसो संवुत्तो[2] । ॥ राजोत्तिष्ठति ॥ [b] अह कहं अज्जउत्तेण सुमरिदो दुक्खभाई अअं जणो ।

[a] उत्तिष्ठत्वार्यपुत्रः । नूनं मे सुचरितप्रतियन्धकं पुराकृतं तेषु दिवसेषु परिणाममुखमासीत् । येन सानुक्रोशोऽप्यार्यपुत्रो मयि विरसः संवृत्तः । [b] अथ कथमार्यपुत्रेण स्मृतो दुःखभाग्ययं जनः ।

---

[1] 'O fair one! let the unpleasant-feeling [unpleasantness] of (my) repudiation (of thee) depart from thy heart. Somehow-or-other at that time the infatuation of my mind was strong. For such, for the most part, is the behaviour of those over-whom-(the quality of)-darkness-has-the-mastery, on happy-(auspicious)-occasions. A blind man shakes off even the garland thrown on his head, suspecting it to be [with the suspicion of its being] a snake.' *Vyalīkam=apriyam*, K.;=*vipriyam*, C. *Apaitu*, some of the Beng. MSS. have *upaitu*, which is unintelligible. *Kimapi*, i. e. *anirvaćanīya-rūpaṃ yathā syāt*, 'in a manner not to be explained,' Ś. *Tadā=pratyādeśa-kāle*, 'at the time of repudiation.' *Prabala-tamasām*, i. e. *prabalam ajñānaṃ yeshaṃ te tathoktāḥ*, K. According to the Hindū philosophy there were three qualities or properties incident to the state of humanity, viz. 1. *Sattva*, 'excellence' or 'goodness' [quiescence], whence proceed truth, knowledge, purity, &c. 2. *Rajas*, 'passion' or 'foulness' [activity], which produces lust, pride, falsehood, &c., and is the cause of pain. 3. *Tamas*, 'darkness' [inertia], whence proceed ignorance, infatuation, delusion, mental blindness, &c. *Śubheshu=sat-karmasu*, 'in auspicious matters,' Ś. *Vṛittayaḥ=vyavahārāḥ*, Ś. *Dhunoti=nirasyati*, K. *Srajam*, see p. 272, n. 1.

[2] 'Assuredly my (evil deeds), committed in a former (birth), opposed to virtuous conduct, were in those days drawing towards (their appointed evil) issue, (seeing) that my husband, although of-a-compassionate-nature, became unfeeling towards me.' *Purā-kṛitam*, i. e. *janmāntara-karma*, Ś.

Verse 188. HARIṆĪ (a variety of ATYASHṬI). See verses 66, 99.

राजा ।

उद्धृतविषाद[1]शल्यः कथयिष्यामि ।

मोहान्मया सुतनु पूर्वमुपेक्षितस्ते
यो वाष्पविन्दुरधरं परिबाधमानः ।
तं तावदाकुटिलपक्ष्मविलग्नमद्य
वाष्पं प्रमृज्य विगतानुशयो भवेयम्[2] ॥१८९॥

॥ इति यथोक्तमनुतिष्ठति ॥

शकुन्तला ॥ नाममुद्रां दृष्ट्वा ॥

[a]अज्जउत्त । एदं तं अङ्गुलीअअं ।

राजा ।

अस्मादङ्गुलीयोपलम्भात्खलु स्मृतिरुपलब्धा ।

[a] आर्यपुत्र । एतत्तदङ्गुलीयकम् ।

(see p. 185, n. 3 at the end). *Pariṇāma-mukham* [*pariṇatābhimukham*, K.], 'about to issue in their appointed fruit, in their matured result,' 'ripe for an evil result.' *Pariṇāma* is 'the last stage of anything,' 'the stage of maturity,' 'the final result:' *mukha*, like *unmukha* (lit. 'looking towards'), has here the sense of 'tending towards,' 'being about,' 'being on the point.'

[1] Cf. p. 272, l. 8; and *uddharen no hṛidaya-śalyam*, Vikram., Act I.

[2] 'O graceful lady! I should in a manner be freed from (my) remorse by wiping off that moisture now clinging to thy slightly curved eye-lashes, which formerly, (in the form of) a tear-drop corroding thy lip, was unnoticed [overlooked] by me through mental-delusion.' *Pūrvam*, i. e. *pratyādeśa-velāyām*. *Paribādhamānaḥ=pīḍayan*, S. *Ā-kuṭila*, cf. *ā-tāmra*, p. 228, l. 3, and p. 298, n. 1. *Vigatānuśayo=apagata-paśćāttāpaḥ*. For *vāshpam* some of the Beng. have *kānte*, unsupported by any of the Deva-n. MSS. The repetition of *vāshpa* seems at first unnecessary, but not if it be borne in mind that *vāshpa* is properly 'the moisture in the eye,' and *vāshpa-vindu*, 'the tear-drop when it has left the eye' (see p. 169, n. 1 in the middle).

Verse 189. VASANTA-TILAKĀ (a variety of ŚAKVARĪ). See verses 8, 27, 31, 43, 46, 64, 74, 80, 82, 83, 91, 93, 94, 95, 100, 104, 105, 108, 123, 124, 144, 148, 152, 157, 168, 170, 181.

शकुन्तला ।

[a] विसमं किदं णेण । जं तदा अज्जउत्तस्स पच्चाअणकाले[1] दुल्लहं आसि ।

राजा ।

तेन ह्यृतुसमवायचिह्नं प्रतिपद्यतां लता कुसुमम्[2] ।

शकुन्तला ।

[b] ण से विस्ससामि । अज्जउत्तो एव्व णं धारेदु ।

॥ ततः प्रविशति मातलिः ॥

मातलिः ।

दिष्ट्या[3] । धर्मपत्नीसमागमेन पुत्रमुखदर्शनेन चायुष्मान्वर्धते ।

राजा ।

अभूत्सम्पादितस्वादुफलो मे मनोरथः । मातले । न खलु विदितोऽयमाखण्डलेन[4] वृत्तान्तः स्यात् ।

मातलिः ॥ सस्मितम् ॥

किमीश्वराणां परोक्षम् । एत्वायुष्मान् । भगवान्मारीचस्ते

a विषमं कृतमनेन । यत्तदार्यपुत्रस्य प्रत्यायनकाले दुर्लभमासीत् । b नास्मै विश्वसामि । आर्यपुत्र एवैनद्धारयतु ।

---

[1] A noun formed from the causal verb explained at p. 297, n. 1.

[2] 'Therefore let the creeper receive again (its) flower, as a pledge [mark, token] of its inseparable-union with the (spring) season,' i. e. receive thou back this ring, as the beautiful twining plant receives again its blossom, in token of its reunion with the spring. *Tena hi*, with the sense of 'therefore,' occurs very frequently in dramatic composition (cf. p. 81, l. 2, p. 83, l. 4, and p. 85, l. 5). *Ṛitu*, see p. 228, n. 1 at the end. *Samavāya*, 'inseparable or intimate connexion.' The Bengālī MSS. have *ṛitu-samāgamāśansi* (the Bengālī recension, *ṛitu-samāgama-ćihnam*), and S. *ṛitu-saṅgama-sūćakam*.

[3] *Dishṭyā*, see p. 299, n. 1. As to *putra-mukha*, &c., see p. 223, n. 1.

[4] *Ākhaṇḍala* is one of a class of epithets (such as *puran-dara*, *bala-bhid*, *giri-bhid*, &c.) applied to Indra, as breaking cities, mountains, &c., into fragments with his thunderbolt (see p. 86, n. 2).

दर्शनं वितरति[1] ।

राजा ।

शकुन्तले । अवलम्ब्यतां पुत्रः । त्वां पुरस्कृत्य भगवन्तं द्रष्टुमिच्छामि ।

शकुन्तला ।

[a] हिरिआमि अज्जउत्तेण सह गुरुसमीवं गन्तुं ।

राजा ।

अप्याचरितव्यमभ्युदयकालेषु[2] । एह्येहि ।

॥ सर्वे परिक्रामन्ति ॥

॥ ततः प्रविशत्यदित्या सार्धमासनस्थो मारीचः ॥

मारीचः ॥ राजानमवलोक्य ॥

दाक्षायणि ।

पुत्रस्य ते रणशिरस्ययमग्रयायी
दुष्यन्त इत्यभिहितो भुवनस्य भर्ता ।
चापेन यस्य विनिवर्तितकर्म जातं
तत्कोटिमत्कुलिशमाभरणं मघोनः[3] ॥१९०॥

